तापनीयोपनिषत्

गोविन्दपण्डिताचार्य्यविरचितभाष्यभूषिता

संशोधयिता सम्पादकश्च
पद्मश्रीपुरस्कृतः, विद्यावाचस्पतिः, विद्यारत्नाकरः,
अभिनवपण्डिताचार्य्यः, **डा. बन्नञ्जे गोविन्दाचार्य्यः**

द्वैपायनप्रतिष्ठानम्
बेङ्गळूरु
2017

TĀPANĪYOPANIṢAT

with the Sanskrit commentary by

Dr. Bannañje Govindācārya.

Published By : Dwaipāyana Pratiṣṭhāna
523, 2nd main, 2nd cross,
New no. 52, Malleshwaram
Bengaluru-560003
9945271641
Dwipayanaprarishana@gmail.com

© Editor

First Edition : 2017 (500 Copies)

Pages : 80

Price : ₹ 100/–

Cover Design : K. M. Sheshagiri

Typeset : Kaddi Badrinarayanachar
Poornaprajna Vidyapeetha,
bnkaddi@gmail.com

Printers : Sri Anirudh Creations
#144, 6th main, Gururaja Layout,
Bengaluru-28. Cell: 9880077876
srikant.nsil@gmail.com

तापनीये विज्ञापनीयम्

तापनीयश्रुतिराथर्वणीयमुपनिषदिति प्रथिता। तापनस्य नरसिंहस्येय-मिति तापनीया। यत्र मन्त्रराजस्य 'उग्रं वीरम्–' इत्यादिकस्य नार-सिंहानुष्टुभस्य समग्रमुपासनरहस्यमुदघाटि। मन्त्रार्थश्च प्रत्यक्षरं प्रतिपदं व्यस्तारि॥

अथ कथं नरसिंहस्तापनः? असतो हिरण्यकादींस्तापयतीति तापनः। सतां प्रह्लादादीनां तापमपनयतीति तापनः। दैत्येनापहृतं स्वर्ग्गसाम्राज्यं पुरन्दराय प्रत्यर्प्य देवानां देवेन्द्रस्य च शत्रुतापमपनयतीति तापनः। 'शत्रजिच्छत्रुतापनः' इति च सहस्रनामसु। भक्तानां दुरितादि-तापमपनयतीति तापनः। 'नृसिंहादिकमन्यत्तु दुरितादिनिवृत्तये' इति हि स्मरन्ति॥

उक्तमाचार्य्यमध्वेनापि–

'नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकरः' इति । अन्ततः संसार-तापमपनयतीति तापनः। अत्रैव च क्रियासमभिहारेण पठ्यते– 'अमृतत्वं च गच्छति' इति॥

सर्वत्र ततः, भक्तनामभीष्टमापयतीति च तापनः। सूर्य्ये ततः, अपां समूहमापम्, वृष्टिद्वारा भूमिं नयतीति च तापनः॥

तारयितृत्वात् तः। आनन्दरूपत्वादा। सर्वपरत्वात् पः। सर्वनम्यत्वान्नः, इति चायं तापनः। तस्मान्नरसिंहतापनीयोपनिषदिति भ्रान्तः पाठः, अनन्वयात्॥

अथेमामुपनिषदं भागद्वयोपेतां पठन्ति– पूर्वतापनीयोपनिषत्, उत्तरतापनीयोपनिषदिति । एवं तु प्रतिभाति– तापनीयश्रुतिरेकैव । पाश्चात्यः पूर्वोत्तरविभागः । उत्तरभागः कैश्चिद् विरच्य निवेशित इति भाति । अत उत्तरो भागो नास्माभिर्व्याख्यातः । अत एव शाङ्करं भाष्यं च पूर्वभाग एव दृश्यते । तत्रैव उपनिषदुपसंहारश्च पठ्यते ॥

* * *

'उग्रं वीरम्–' इत्यादेरानुष्टुभस्य नरसिंहमन्त्रस्य प्रत्यक्षरं प्रतिपदमर्त्थवर्ण्णनपरेयमुपनिषत् तस्य मन्त्रराजस्य महान्तं महिमानमप्युपस्थापयति प्रथमैश्चतुर्भिः परिच्छेदैः । पञ्चमः परिच्छेदः चक्रात्मकं मन्त्रवर्ण्णमयं नरसिंहयन्त्रं विस्तरतः प्रस्तौति । यन्त्रस्य रेखामयं चित्रमिदम्प्रथमतयाऽस्मिन् प्रकाशने मुद्रितम् । तस्यानुष्ठाने पुनरुपयोगं सन्तः कुर्य्यासुरित्याशास्महे ॥

* * *

इयमुपनिषद् आचार्य्यमध्वेनापि समुद्धृता स्वयमनुव्याख्याने– 'तापनीयश्रुतौ श्रुतः' इति । अथाप्यस्यास्तत्ववादानुगुणं व्याख्यानं न केनापि कृतम् । तत्ववादप्रियाः केचन मां विज्ञापयमासुः– अस्याः प्रवचनं क्रियतामिति । तेषामाशापूर्त्त्यर्थं केषाञ्चन विनेयानां मयोपनिषत्पाठः प्रारब्धः । ततस्तत्समकालं भाष्यमपि किं न रचयानीति मम मनसि पुस्फोर । अद्भुतो भगवतो नरसिंहस्यानुग्रहः । पाठः नाद्याप्यवसितः । विघ्नप्राचुर्य्येण विच्छिद्यविच्छिद्य प्रवर्त्तते । किन्तु भाष्यमवसितम् । समुपाश्रितं च सम्प्रति सज्जनक्रोडम् । दिष्टस्य यदिष्टम्, दिष्टेन च यदादिष्टं तदेव भवति । परं मन्दा ईर्ष्यया चासूयादग्धा मुधाऽनल्पं जल्पन्ति । सन्तः पुनरनसूयाभूषणा आशिषा योजयन्ति ॥

अस्याः श्रुतेः बहुधा पाठाः प्रचलिता दृश्यन्ते । नैकोऽप्यन्ततः शुद्धः पाठः । अथापि यथासम्भवं शुद्धपाठान्वेषणं कृतम् । सम्प्रति तावदेव शरणम् । यदि शुद्धतमः पाठ उपलभ्यते द्वितीयमुद्रणे स उपयुज्यते । तावत्पर्य्यन्तं एतावतैव सन्तोष्टव्यम् ॥ ✻ ॥

अस्माभिर्न्न किमप्युट्टङ्कितम् । अनुव्याख्याने भगवत्पादेन तापनीयश्रुतेरेकं मन्त्रं व्याख्याय दर्शितः पन्थाः । तेनैव पथा पतन्तो वयं तत्ववादानुगुणं समग्रं व्याख्यानं व्यरचयाम । सतामिदमुपहरणम् ॥

✻ ✻ ✻

द्वैपायनप्रतिष्ठानमस्याः सभाष्यायाः उपनिषदः मुद्रणे च प्रकाशने च परिष्कृतकटिबन्धम् । निरन्तराया निरन्तरा चास्तु प्रतिष्ठानसदस्यानां सात्विकश्रद्धा । चिरमभिवर्द्धतां प्रतिष्ठानम् ॥

✻ ✻ ✻

अस्य गणकयन्त्रेण लिप्यङ्कने यथापूर्वं सश्रद्धं कृतपरिश्रमः श्रीलः कड्डि बदरीनारायणाचार्य्यः, शोधनकर्म्मणि श्रीलः पर्कळ वेङ्कटेशबायरिमहोदयः, मुखपत्रविन्यासेन यन्त्रविन्यासेन कृतसहकारः कलाभिज्ञः श्रीलः के.एम्, शेषगिरिशर्म्मा, मुद्रणकार्य्ये कृतसहकारः 'अनिरुद्ध क्रियेशन्स्' संस्थायाः प्रवर्त्तकः श्रीलः कल्याणि श्रीकान्तशर्म्मा– सर्व एते सङ्गत्य प्रकाशनस्य सुषमातिशयमादधुः । तेषां सहार्द्दं कार्त्तज्ञ्यमर्प्पयति द्वैपायनप्रतिष्ठानम् ॥

भवदीयः

–बन्नञ्जेपदोपाह्वः गोविन्दाचार्य्यः

नृसिंहस्तवः

अस्तु तेजस्वि नोऽधीतमस्तु च ब्रह्मवर्च्चसम् ।
सम्पादयेम हि सहः सह वीर्य्यं कृषीमहि ॥ १ ॥

स्तम्भं निर्भिद्य निर्य्यन्निखिल-जगदघ-क्षाळनायाव-तीर्ण्णं
पूर्ण्णं स्वर्ण्णोपमान-द्युति-विहत-तमस्तोममस्तारि-वर्ग्गम् ।
स्वस्ति श्रीमत् समस्त-श्रुति-गदितमहो तन्महो नो विदद्ध्यात्
पश्चास्यं कन्धराया उपरि परि-गतं देव-वृन्दैरमन्दैः ॥ २ ॥

उग्रं व्यग्रेन्द्र-लोकाभयदमरि-दराद्यायुधोदग्र-बाहुं
रुद्रं रुद्रेन्द्र-मुख्यामर-गण-विनुतं भद्र-विज्ञान-मुद्रम् ।
वीरं वीरासन-स्थं भव-भय-हरणं दारणं दारुणानां
रूक्षं त्र्यक्षं महेक्षं क्षपित-दुरितमक्षोभणीयं दिदृक्षे ॥ ३ ॥

ज्वलत्कनक-पिञ्जरं कलित-भक्त-हृत्पञ्जरं
चिरं मुदित-निर्ज्जरं श्रुति-महाटवी-कुञ्जरम् ।
भजे भुवन-बन्धुरं हृदि निजेन्दिरा-मन्दिरं
परं तुरग-कन्धरं दर-धरं नृ-कण्ठीरवम् ॥ ४ ॥

जगन्निधान-पिठरं नृ-हरेर्ज्जठरं नुमः ।
यन्नाभि-कुहरोद्भूतस्तनयो हंस-वाहनः ॥ ५ ॥

यदुत्सङ्गासङ्गा जगदुदय-भङ्गाऽब्धि-तनया
यदुद्गीता गीता विषय-विष-भीतावनकरी ।
सुधी-मुद्रा भद्रा दुरित-गण-विद्रावण-करी
नमस्तस्मै कस्मैचिदमर-पुषे सिंह-वपुषे ॥ ६ ॥

नर-केसरिणं धिक्कृत-हिरण्य-करिणं च सूकरिणम् ।
तोषित-बुध-जन-हरिणं वरिनं दरिणं स्मरामि मन्दरिणम् ॥
॥ ७ ॥

इममाचार्य्य-गोविन्दे सन्निधाय हरिस्तवम् ।
रचयामासतुः प्रेम्णा प्राण-नारायणौ स्वयम् ॥ ८॥

—०—

ध्यायेन्नृसिंहमुरु-वृत्त-रवि-त्रिनेत्रं

जानु-प्रसक्त-कर-युग्ममथापराभ्याम् ।

चक्रं दरं च दधतं प्रियया समेतं

तिग्मांशु-कोट्यधिक-तेजसमग्र्य-शक्तिम् ॥

—तन्त्रसारसङ्ग्रहः

*

नरसिंहोऽखिलाज्ञान-मत-ध्वान्त-दिवाकरः ।

जयत्यमित-सज्ज्ञान-सुख-शक्ति-पयोनिधिः ॥

—मायावाददूषणम्

तापनीयोपनिषत्

सभाष्या

*

ॐ देवं श्रीनरसिंहं वाग्देवीप्राणधामानम् ।
विवृणोमि तापनीयां तत्वा नत्वाऽथ सामनामानम् ॥ ✻ ॥

गहनार्त्थां श्रुतिमेतामन्यैरन्यैरन्यथाऽन्यथा विवृताम् ।
व्याकर्त्तुमनसि तु मयि प्रीणीतां प्राणनरसिंहौ ॥ ✻ ॥

अथातः श्रीतापनीयोपनिषदं व्याख्यास्यामः । कथं तापनीया? तापं नयति अपनयति चेति तापनो भगवान् नरसिंहः । तपनगतत्वाच्च तापनः । 'द्ध्येयः सदा सवितृमण्डलमद्ध्यवर्त्ती' इति नारसिंहपुराणे । तस्येयं श्रुतिर्भवति । उपनिषद् रहस्यविद्या ॥

अथर्ववेदगता चेयम् । तस्मादयं शान्तिमन्त्रः–

ओ३म् ॥ भद्रं कर्ण्येभिः शृणुयाम देवाः
भद्रं पश्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि-
र्व्यशेम देवहितँय्यदायुः ॥ ✻ ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु ॥ ❊ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

यजन्तीति यजत्रा इति वैयाकरणाः । यजनेन यष्टारं त्रायन्त इति तु वयम् । हे **यजत्राः** तत्वाभिमानिनो **देवाः** । **भद्रं** भगवन्तम् । अन्यच्च **भद्रं** कल्याणम् । **अक्षभि**रक्षिभिः । **तनूभि**र्भाविनीभिरपि । **यदायु**र्भगवता दत्तम्, यावदायुरित्येतत् । तत् सर्वं देवानां देवस्य च **हितं** यथा स्यात् तथा **व्यशेम** विहितमश्याम अनुभवेम ॥

वृद्धश्रवाः पुण्यश्रवणकीर्त्तन **इन्द्रः** प्रद्युम्नः । 'प्रद्युम्नश्चेन्द्रनामकः' इति हि स्मरन्ति । **स्वस्ति** सन्ततसौख्यं जीवनं **दधातु** ददातु । **पूषा** पोषणकर्त्ता स्थितिहेतुरनिरुद्धः । विश्वं यस्य वेदः स्वम् । तारयति संसारात् क्षपयति च दुःखमिति **तार्क्ष्यः** सङ्कर्षणः । **अरिष्टनेमिः** अप्रतिहतायुधः संहार-कर्म्मणि । बृहस्पतिः बृहतां मुक्तानामपि पतिर्वासुदेवः । प्रतिपादं **स्वस्ति नः** इत्याम्रेडनं मन्त्रशोभां पुष्णाति प्रार्त्थनाभरं च द्रढयति । **नः** इति आत्मनि बहुवचनं वा स्यात् । नः सर्वेषां साधकानां साधूनामिति वा स्यात् । प्रार्त्थयितुर्य्यथानुसन्धानं मन्त्रार्त्था भवन्ति ॥

नरसिंहो देवतेति स्फुटम् । संसारतापापनोदः फलमिति । तदिच्छुस्तद्योग्यः अधिकारी । अयोग्यान् तापयतीति च तापनः । तद्योग्यत्वमर्त्थाल्लब्धम् । यथायोग्यं सम्बन्धः ॥

हयमुखश्चतुर्म्मुखश्च ऋषी । निगदप्रायत्वात् न च्छन्दश्चिन्ता । तापनो देवता ।

अथ मन्त्रार्थः–

आपो वा इदमासन् सलिलमेव । स प्रजापतिरेकः पुष्करपर्ण्णे समभवत् । तस्यान्तर्म्मनसि कामः समवर्त्ततेदं सृजेयमिति । तस्माद् यत् पुरुषो मनसाऽभिगच्छति तद् वाचा वदति तत् कर्म्मणा करोति । तदेषाऽभ्युक्ता–

कामस्तदग्रे सामवर्त्तताधि
मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन्
हृदि प्रतीष्या कवयो मनीषेति ॥

उपैनं तदुपनमति यत्कामो भवति य एवं वेद ॥ १॥

इदं सर्वं सृष्टेः पूर्वम्, **आप** एव **आसन्** इति यत् शास्त्रेषु वै प्रसिद्धं 'अप एव ससर्ज्जाऽदौ' इत्यादिषु तदिदं मूलप्रकृतिरूपं **सलिलमेव** ॥

ननु प्रळये कथं सलिलसम्भवः? आह– **आपो वै** । आप्नुवन्तीत्यापः । आपान्ति आपिबन्ति आपिप्रतीति च आपः । सर्वकालदेशयोर्ग्गतः सर्वपाता सर्वात्ता च सर्वगुणपूर्ण्णोऽनन्तरूपो भगवान् । तानि भगवद्रूपाणि प्रळयकाले अव्यक्तान्यासन् । तदिदं **सलिलमेव** । सलिलमिति सलीलम् । भगवतो लीलेयम्– यदपां सृष्टिस्तासु वीर्य्यविसर्ज्जनमिति ॥

सः प्रजानां पालनात् **प्रजापतिरित्युक्तो** नारायणः । **एक** एव **पुष्करपर्ण्णे समभवत्** । पुष्करमिति जलमुच्यते । तथाच पुष्करे प्रळयजले प्लवमाने पर्ण्णे छन्दोमये वटपत्रे शयानः **समभवत्** । सम्पूर्ण्णगुण एवाभवत् । सं

नारायण इति वा । 'अकयप्रविसम्भूम–' इत्यादिवचनात् । 'छन्दांसि यस्य पण्र्णानि' इति हि गीतासु । 'पुष्करं गगनपद्मवारिषु' इत्यभिधानम् । अथ च आप इति बहुवचननिर्द्दिष्टोऽपि प्रजापतावाविष्टः प्रजापतिनामा सन् सम्भूतः । अथच **एकः** प्रजापतिषु मुख्यः चतुर्म्मुखः स भगवन्नाभिकमले **समभवत्** अजायत ।।

भगवतः लोकवल्लीलाकैवल्यमेव स्फुटयति– **तस्य** आप्तकामस्यापि **अन्तर्म्मनसि कामः समवर्त्तत इदं** ब्रह्माण्डं **सृजेयमिति** । सृज्यसृष्टावीक्षा बभूवेत्येतत् । अत एव कामं मनोजमाहुः । **तस्मात्** अद्यापि **पुरुषः** पुरि सन् जीवः स्त्री वा पुमान् वा आदौ **मनसा अभिगच्छति** सङ्कल्पयति । यत् सङ्कल्पयति **तत्** तदेव **वाचा वदति**– इदमहं चिकीर्षामीति । यद् वदति **तत् कर्म्मणा** कृतिरूपतापादनानुकूलव्यापारेण **करोति** निष्पादयति इति ।।

तत् तस्मिन्नर्थे **एषा** वक्ष्यमाणा ऋक् अभियुक्तैर्दृष्ट्वाऽभिहिता–

कामस्तदग्रे (ऋ.सं.१०.१२९.४) नासदीयसूक्ते सप्तर्चे चतुर्थी ऋक् । प्रजापतेः परमेष्ठिन आर्षम् । भाववृत्तम् । त्रिष्टुप् ।।

तस्य स्थूलप्रपञ्चसर्ग्गस्य **अग्रे पूर्वं अधिकः** उत्कटः **कामः समवर्त्तत** । बाह्येन्द्रियाभिमानिभ्यः पञ्चभूताभिमानिभ्यश्च अधिक इति वा । **मनसो रेतः** कार्य्यम् । **प्रथमं यदासीदिति** । आदाविच्छति ततो वदति करोतीति कामः मनसः प्रथमं कार्य्यम् । एवं **सतः** जगतः **बन्धुं** प्रवृत्तिहेतुत्वात् सहायकम्, बन्धकं कामम् । **असति** भगवति । असदित्यव्यक्तमुच्यते । 'असदेवेदमग्रऽआसीत्' इति श्रुतिश्च । भगवति पुत्रत्वेन निश्चित्यालभन्त । एवं सत्कर्म्मणो बन्धुमसत्कर्म्मणि **निरविन्दन्** । **सतः** निर्द्दोषस्य

नारायणस्य पुत्रत्वेन **बन्धुं असति** जगति व्याप्तत्वेन **निरविन्दन्** । **सतः** सुखस्य **बन्धुं** असत्कार्य्यकरणेच्छया **असति** दुःखे । निमित्तसप्तमी । दुःखार्थ**मविन्दन्** । के? **कवयः** ज्ञानिनः । **हृदि प्रतीष्या** प्रतीष्य विचार्य्य । पौनःपुन्येन विमृश्य । इष आभीक्ष्ण्ये । इष इच्छायां वा । संहितायां दैर्घ्यं चिन्तनस्य दाढ्यर्मिाह । **मनीषा** बुद्ध्या निश्चित्य **अविन्दन्**। भगवज्ज्ञानलाभार्थमविन्दन्। लौकिककामनासु निर्वेदवन्तो बभूवुः ॥ ❊ ॥

य एवं वेद स **यत्कामो भवति** तत् काम्यं **तमेनं** वेदितारं **उप** उत्कृष्टतया उपनमति उपगच्छति ॥ १ ॥

स तपोऽतप्यत । स तपस्तप्त्वा । स एतं मन्त्रराजं नारसिंहमानुष्टुभमपश्यत्। तेन वै सर्वमिदमसृजत यदिदं किञ्च । तस्मात् सर्वमिदमानुष्टुभमित्याचक्षते यदिदं किञ्च। अनुष्टुभो वा इमानि भूतानि जायन्ते। अनुष्टुभा जातानि जीवन्ति। अनुष्टुभं प्र यन्त्यभि सं विशन्ति। तस्यैषा भवति–

अनुष्टुप् प्रथमा भवत्यनुष्टुबुत्तमा भवति ।
वाग् वा अनुष्टुब् वाचैव प्र यन्ति वाचैवोद्यन्ति ।
परमा वा एषा च्छन्दसां यदनुष्टुबिति ॥ २ ॥

मन्त्रं मन्त्रार्थं च सहैव स्तौति– **स तपोऽतप्यत। सः** प्रजापतिः। नारायणः ब्रह्मा वा। एवं प्रजाः सृजेयमिति तपोऽतप्यत आलोचयामास। नारायणस्य

ज्ञानाभिव्यक्तिः । 'यस्य ज्ञानमयं तपः' इति श्रुतेः । ब्रह्मा नारायणेन 'तप' इत्यादिष्टः कथं करणीयमिति चिन्तयामास । **सः** पूर्ववाक्ये प्रस्तुतः **सः** नारायणः । प्रथमस्तच्छब्दः । द्वितीयः सशब्दः । 'अकयप्रवि-सम्भूमसखहा विष्णुवाचकाः' इति स्मरणात् । पक्षान्तरे **सः** जीवेषु सारत्वेन प्रथितः **स** चतुराननः ॥

तत्त्वा किञ्चकार? **एतं मन्त्रराजमपश्यत्** । मन्त्राणां राजानं नरसिंहदेवत्यं अनुष्टुप्छन्दोबद्ध**मपश्यत्**– उग्रं वीरमित्यादि । नित्यं पश्यन्नपि तदानीमभिव्यक्तं चकार । अथ च मन्त्रैः राजन्तं पुरुषश्रेष्ठं अनुष्टुप्शब्द-वाच्यं स्वरूपमेव स्रष्टृत्वेनापश्यत् । कथमनुष्टुप्? अनुष्टोभत इति । ष्टुभु स्तम्भे । स्वेच्छानुसारेण सर्वं जगत् स्वस्वस्थाने अचलतया स्थापयिष्य-तीति । अथ चतुराननोऽप्येवं ध्याने पुरुषरूपमपश्यत् । स्वान्तर्य्यामिणं ब्रह्मरूपं च ॥

ततो रूपसृष्टिमाह– **तेन वै** सृष्टेन पुरुषरूपेण अनुष्टोभिष्यमाणः **सर्वमिदं** स्वोदरस्थं जग**दसृजत** । सृष्टिरियं भगवतो लीलेत्यात्मनेभाषा । पुनर्ब्रह्मात्मना चासृजत् । **यदिदं किञ्च** चराचरात्मकम् । वाच्यसृष्टेः पूर्वं विद्यमानानि सर्वाणि पदानि वाच्यान्तरविरहात् भगवन्नामान्येव । तस्मादनुष्टुबिति मूलतः भगवन्नामैव । तदुक्तं बादरायणेन– 'छन्दोऽभि-धानान्नेति चेन्न तथा चेतोऽर्प्पणनिगदात्–' (१.१.२५) इति । 'सर्व-च्छन्दोभिधो ह्येष सर्वदेवाभिधोऽप्यसौ । सर्वलोकाभिधोऽप्येष तेषां तदुपचारतः' इति च स्म हि स्मरन्ति । 'स्वेच्छानुसारेण स्तोभनादनुष्टुप्' इति तत्वप्रदीपे ॥

यस्मादनुष्टुप्पदवाच्येन पुरुषाख्येन नरसिंहेन सर्वमिदं सृष्टं **तस्मात् सर्वमिदमाचक्षत आनुष्टुभमि**ति तद्विदः, अनुष्टुभ इदमिति ॥

तदेव विव्रियतेऽनुष्टुभि ब्रह्मलक्षणसमन्वयेन– अनुष्टुभो वै । **प्र यन्ति** प्रळये यन्ति । **अभि** अभीक्ष्णं निरन्तरं **सं** नारायणं **विशन्ति** मोक्षे । अनुष्टुब्देवतायां सरस्वत्यां च यथासम्भवं भूतजननादिकमनुसन्धेयम् । **तस्या**नुष्टुभो नारायणस्य सरस्वत्याश्च स्तुतिरूपा ऋक् **एषा भवति** । अपूर्वेयमृक् पञ्चपादा । प्रथमं पादद्वयं बार्हेतम्– **'अनुष्टुप् प्रथमा भवति'** इति, **'अनुष्टुबुत्तमा भवति'** इति । ततो द्वावानुष्टुभौ– **'वाग् वा अनुष्टुब् वाचैव'** इति, **'प्र यन्ति वाचैवोद्यन्ति'** इति च । पञ्चमस्त्रयोदशाक्षरः पाद इति भुरिग्जागतः । संहत्य च (१८+१६+१३=) सप्त-चत्वारिंशदक्षर इति निचृज्जगती च्छन्दः । अयं मन्त्रार्थः– **अनुष्टुप्** सर्व-**प्रथमा भवति** । 'आत्मा वा इदमग्र आसीत्', 'वासुदेवो वा इदमग्र आसीत्' इत्यादेः । अत एवानुष्टुप् सर्वोत्तमा भवति । **प्रथमे**ति कालतोऽ-नन्तत्वमुक्तम् । **उत्तमे**ति गुणतः । सरस्वती च सर्वस्त्रीजीवेषु प्रथमा चोत्तमा च । स एव हयग्रीवरूपेण सर्ववेदानां प्रथमवक्तृत्वात् **वाग् वै** । तत्रापि ब्रह्मलक्षणं समन्वयते– **वाचैव प्र यन्ति** नश्यन्ति । स्थितिं वा प्राप्नुवन्ति । वाग्देवता हि सरस्वती । दशममण्डलोक्तानां छन्दोमानिनी**नामेषा वै** सरस्वती परमा । छन्द्यते संवृतो भवतीति भगवान् । छदि संवरणे । देवा अपि च्छन्ना इति च्छन्दासि । भगवांस्तु परमच्छन्नः । तदाह– **परमा वै एषा च्छन्दसां यदनुष्टुब्**नामा नारायण इति । 'छन्द्यत्वाच्छन्दः' इति तत्वप्रदीपे । **वाचैव उद्यन्ति** उदयं प्राप्नुवन्ति । छन्दानुवर्त्तिनां देवाना**मेषा परमा** । सर्वदेवोत्तमा । स्त्रीलिङ्गेन मातृत्वेनोपासनामाह गायत्रीवत् ॥ २ ॥

ससागरां सपर्वतां सप्तद्वीपां वसुन्धरां तत् साम्नः प्रथमं पादं जानीयात् । यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षं

तत् साम्नो द्वितीयं पादं जानीयात् । वसुरुद्रादित्यैः सर्वैर्देवैः सेवितं दिवं तत् साम्नस्तृतीयं पादं जानीयात् । ब्रह्मस्वरूपं निरञ्जनं परमव्योमकं तत् चतुर्थं पादं जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ ३ ॥

अथ स्त्रीत्वेन पुंस्त्वेन च मातृत्वेन पितृत्वेन चोपासनमाह– **साम्नः प्रथमं पादं जानीयादि**ति । स्त्रीरूपाणि स्त्रीपदेनोच्यन्ते । पुंरूपाणि पुम्पदेन । उभयरूपाणि नपुंसकपदेन । न केवलं पुमान् । स्त्री चायम् । अथापि न स्त्री न पुमान् लौकिकस्त्रीपुंसाविव ॥

सा इति सरस्वती । अम इति प्राणः । 'सेति भार्य्या हि वाग्देवी प्राणोऽमः परिकीर्त्तितः' इति हि स्मरन्ति । वाणीप्राणयोरन्तर्य्यामी स्त्रीपुंसरूपो नारायणः सामनामा । 'पादोऽस्य विश्वा भूतानि' इति समस्तं चराचरात्मकं जगत् तस्यैकः पाद इत्युक्तम् । तमेकं पादं त्रिपात्त्वेनाप्युपास्यं लोकत्रयगतत्वेनेदानीमाह– **ससागराम्** । वाणीप्राणनियामकः लक्ष्मीसहितो नारायणोऽत्र सामशब्दोक्तः । सा रमा । अमो नारायणः । **वसुन्धरां** भूर्लोकम्, **प्रथमं पादं जानीयात्** अनिरुद्धाख्यम् । भुवोलोकं लक्ष्मीनरसिंहस्य **द्वितीयं पादं जानीयात्** प्रद्युम्नाख्यम् । **दिवं** स्वर्गलोकं **तृतीयं पादं जानीयात्** सङ्कर्षणाख्यम् । रूपत्रयमपि ब्रह्मस्वरूपम् । अथापि बृहस्पतिरिति ब्रह्मेति विशिष्य वासुदेव उच्यते । तथाच नरसिंहानिरुद्धो भूर्लोकगतः । नरसिंहप्रद्युम्नो भुवोलोकगतः । नरसिंहसङ्कर्षणः स्वर्लोकगत इत्युदितम् । इदानीं मोक्षनियामकं नरसिंहवासुदेवाख्यं रूपमाह– **ब्रह्मस्वरूपं** वासुदेवाख्यम् । 'ब्रह्म पन्थाः सत्यं कर्म्मेति वासुदेवाद्याः क्रमेण चतस्रो

मूर्त्तयः' इत्यैतरेयभाष्यम् । **निरञ्जनं** निर्दुःखं निर्दोषम् । भूर्भुवःस्वरिति सदुःखं सदोषम् । **परमव्योम** मुक्तस्थानम्, **कं** केवलानन्दमयम् । 'कं ब्रह्म खं ब्रह्म' इति श्रुतेः । **चतुर्त्थं पादं जानीयात्** नरसिंहवासुदेवाख्यम् । य एवमुपास्ते **सः अमृतत्वं गच्छति** । न केवलमवान्तरफलानि । किन्तु मुख्य**ममृतत्वं च गच्छति** ॥ ❊ ॥

ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्ति ॥ ४ ॥

अथ नामात्मकप्रपञ्चगतत्वमाह– **चत्वारो वेदाश्चत्वारः पादा भवन्ति** । नरसिंहानिरुद्धः ऋग्वेदगतः ऋङ्नामा प्रथमः पादः । ऋच स्तुतौ । ऋचतीति वेद ऋक् । ऋचन्त्येनमिति भगवान् ऋक् । नरसिंहप्रद्युम्नो यजुर्वेदगतो यजुर्न्नामा । यजन्त्यनेनेति वेदो यजुर्न्नामा । इज्यत इति भगवान् यजुः । नरसिंहसङ्कर्षणः सामवेदगतः सामनामा । साम सान्त्वने । उग्रो नरसिंहः गानेन साम्यते सान्त्वितः शान्तः क्रियत इति साम भगवान् । 'वेदानां सामवेदोऽस्मि' इति हि गीतायाम् । सामयति सान्त्वयति भगवन्तमिति वेदः सामनामा । नरसिंहवासुदेवश्चतुर्थः पादोऽथर्ववेदगतोऽथर्वनामा । अथर्वणा दृष्टत्वादथर्वा वेदः । अथर्वणि स्थितत्वादथर्वा भगवान् । अकार वाच्यत्वादः । सर्वेषां हृदि स्थितत्वात् थः । अर्वा वाजिवक्त्रा वक्त्री वेदान् वासुदेवस्य मूर्त्तिः । सर्वे वेदाः शीक्षाद्यङ्गसहिताः । ऋचां चतुर्विंशतिः शाखाः । गायत्र्यक्षरगता भगवतश्चतुर्विंशतिमूर्त्तयस्तद्गताः । यजुषामेकोत्तरं शतम् । शतं कलशदेवा सनारायणास्तद्गताः । साम्नां सहस्रम् । विश्वादिसहस्रमूर्त्तयस्तद्गताः । अथर्वणां द्वादश शाखाः । वासुदेवद्वादशाक्षरगताः केशवाद्यास्तद्गताः । ताभिः सहिताः । अथ मन्त्रेऽपि

ऋक्सार उग्रं वीरमित्यादिः प्रथमः पादः । यजुःसारो द्वितीयः । सामसारस्तृतीयः । अथर्वसारस्तुरीय इति ॥ ४ ॥

किं द्ध्यानं किं दैवतं कान्यङ्गानि कानि दैवतानि किं छन्दः क ऋषिरिति ॥ ५ ॥

अथ देवाः प्रजापतिं पप्रच्छुः । अस्य मन्त्रस्य **किं द्ध्यानम्**? कीदृशं देवतारूपद्ध्यानम्? **किं दैवतम्**? का देवता? नारसिंहो देवतेति सामान्यतो ज्ञातमेव । प्रकारप्रश्नोऽयम् । किम्प्रकारं दैवतम्? कति बाहवः, कान्यायुधानीत्यादि । अस्य वक्ष्यमाणस्य महामन्त्रस्य अङ्गमन्त्राः के? कानि चावान्तरमन्त्राणामवान्तरदेवताः? **किं छन्दः**? महामन्त्रस्याङ्ग-मन्त्राणां च । कश्च मन्त्रद्रष्टा मूलऋषिरिति जानतामपि देवानां लोकशिक्षायै विशेषज्ञानाय च प्रश्नः ॥ ५ ॥

स होवाच प्रजापतिः । स यो हवै सावित्रस्याष्टाक्षरं पदं श्रियाऽभिषिक्तं तत्साम्नोऽङ्गं वेद । श्रिया हैवा-भिषिच्यते । सर्वे वेदाः प्रणवादिकाः । तं प्रणवं तत्साम्नोऽङ्गं वेद स त्रीन् लोकान् जयति । चतुर्विंशत्य-क्षरा महालक्ष्मीर्य्यजुः । तत्साम्नोऽङ्गं वेद स आयुर्य्यशः-कीर्त्तिज्ञानैश्वर्य्यवान् भवति । तस्मादिदं साङ्गं साम जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ ६ ॥

स प्रजापतिः हर्षादुवाच । **सावित्रस्य** मन्त्रस्याष्टाक्षरं **पदं** पदजातम् । सूरिय इति व्यूहेन । **श्रिया** श्रीबीजेन शिरसि **अभिषिक्तं** मन्त्रशिरसि

श्रीबीजयुक्तम् । 'श्रीम् घृणिः सूर्य आदित्यः' इति । तत् साम्नः नृसिंहमन्त्रप्रतिपाद्यस्य लक्ष्मीनरसिंहस्य प्रथमोऽङ्गमन्त्रः । **य** एवं **वेद स श्रिया** सकलभौतिकसम्पदा समस्तवेदसम्पदा सर्वदा युक्तो भवति । त्रीन् वेदान् जयतीत्यर्थः । त्रयोऽपि वेदाः तस्य स्वहृदयं विवृणत इत्येतत् ॥

सर्वे वेदाः प्रणवादिकाः– हरिः ओमिति । प्रणवान्ताश्च । 'स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्य्यते' इति स्मरणात् । **तं प्रणवं** लक्ष्मीनरसिंहमन्त्रस्य द्वितीयमङ्गमन्त्रं यो **वेद स त्रीन् लोकान् जयति** त्रिभिरक्षरैः । **महालक्ष्मीः** महालक्ष्मीपदघटितः महालक्ष्मीमन्त्रः । कोऽयं मन्त्रः? **चतुर्विंशत्यक्षरा यजुः** याजुषी अनुष्टुबित्यर्थः । पादनैयत्याभावाद् यजुरित्यर्थः । तदेतत् साम्नो भगवतस्तृतीयोऽङ्गमन्त्रः । उपरिष्टाद् वक्ष्यते । य एवं वेद स पूर्णेनाऽयुषा, व्याप्तेन यशसा साधुरयमिति कीर्त्यमानः, ज्ञानाख्येन भौतिकेन चैश्वर्य्येण युक्तो भवति । यश्चैभिरङ्गमन्त्रैः सहितम्, तदर्त्थत्वेनाधिगतम् नारसिंहमन्त्रप्रतिपाद्यम्, **साम**नामानं भगवन्तं **जानीयात् स** मुख्य**ममृतत्वं गच्छति** । पूर्वमङ्गमन्त्रफलमनुभवति । अन्ते **अमृतत्वं च गच्छती**त्यर्थः ॥ ६ ॥

सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति । द्वात्रिंशदक्षरं साम जानीयाद् यो जानाति सोऽमृतत्वं च गच्छति । सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात् स्त्रीशूद्रः स मृतोऽधो गच्छति । तस्मात् सर्वदा नाऽचष्टे । यद्याचष्टे स आचार्य्यस्तेनैव स मृतोऽधो गच्छति ॥ ७ ॥

सावित्रीं विद्याम्, सवितुरष्टाक्षरं पदम्, **प्रणवम्,** चतुर्विंशत्यक्षरां वक्ष्यमाणां याजुषीं लक्ष्मीविद्यां **स्त्रीशूद्राय** दातुं **नेच्छन्ति** द्रष्टार ऋषयः । स्त्रियश्च शूद्राश्च स्त्रीशूद्रम् । पुंस्त्वमार्षम् । ब्रह्मबन्धूनामुपलक्षणम् । 'स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा' इति स्मरणात् । नायं श्रवणमात्रनिषेधः । शान्तिपाठपूर्वकं गुरुमुखान्मन्त्रोपदेशग्रहणमिह निषेधविषयः । उपासनार्थमुपदेशनं वा । अत एवोपरिष्टात् जानीयादित्याह । श्रुत्वा मत्वा उपासीतेत्यर्थः । **द्वात्रिंशदक्षरं साम** नारसिंहमानुष्टुभम् । द्वात्रिंशाक्षरप्रतिपाद्यं साम लक्ष्मीनरसिंहं च । एतन्मन्त्रत्रयस्य ज्ञाने स्त्रीशूद्रस्य को दोषः? **स मृतोऽधो गच्छति** । आचार्य्योऽपि स्त्रीशूद्राय **यद्याचष्टे** उपदिशति तेनैव अनधिकारिषु विद्यादानेन निमित्तेन **स मृतोऽधो गच्छति** । स्त्रीशूद्रस्य स्वभावतो दुर्बलत्वात् साधनानुष्ठानवैकल्येनोभयोराचार्य्यशिष्ययोरपि दुरितमेव स्यात् । मन्त्रस्योग्रत्वात् । अत एव– 'आहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके' इति स्मरन्ति । दुर्बलेभ्यो दत्ता विद्या व्यर्था भवेत्, अनर्था भवेत्, अपार्था वा भवेत् । आह हि विद्यादेवता– 'विद्या हवै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि' इति ॥ ७ ॥

स होवाच प्रजापतिः । अग्निर्वै देवा इदं सर्वं विश्वा भूतानि प्राणा वा इन्द्रियाणि पशवोऽन्नममृतं सम्राट् स्वराड् विराट् तत् साम्नः प्रथमं पादं जानीयात् । ऋग्यजुःसामाथर्वरूपः सूर्य्योऽन्तरादित्ये हिरण्मयः पुरुषः तत् साम्नो द्वितीयं पादं जानीयात् । य ओषधीनां प्रभुर्भवति तारापतिः सोमस्तत् साम्नस्तृतीयं पादं

जानीयात्। स ब्रह्मा स शिवः (स हरिः) सेन्द्रः सोऽक्षरः परमः स्वराट् तत् साम्नश्चतुर्त्थं पादं जानीयात्। यो जानीते सोऽमृतत्वं च गच्छति ॥ ८ ॥

अथ स **होवाच प्रजापतिर्देवेभ्यः** नृसिंहानुष्टुभः पादशो महिमानम्। मन्त्रप्रतिपाद्यस्य साम्नः लक्ष्मीनरसिंहस्य वक्ष्यमाणं रूपं **प्रथमं पादं** प्रथमपादप्रतिपाद्यं **जानीयात्** ज्ञ्यायेत्– **अग्निर्वै**। भुवि भगवत्प्रतीकत्वेन प्रसिद्धोऽग्निः। तस्मिन् गतोऽग्निनामा। न केवलम्। सर्वदेवगतत्वेन देवनामा। अत्तीति दीव्यतीति च। **इदं** दृश्यमानं **सर्वं** विश्वम्। तद्गतः सर्वनामा विश्वनामा। आब्रह्म स्तम्बपर्यन्तानि **विश्वानि भूतानि** चराचराणि। तेषु गतः भूतनामा। विश्वानि भूतानि भूतिमन्ति वा। 'यद्यत् विभूतिमत् सत्वम्' इति भगवद्वचनात्। भूतानि भगवद्रूपाणि वा। सर्वेऽवताराः सर्वनामान इति। अत्यन्ताभेदात्। दश पञ्च वा **प्राणाः**। तद्गतस्तन्नामा प्रणयनात्। ज्ञानकर्म्मेन्द्रियेषु गतस्तन्नामा स्वयमेवेन्द्रियमिति, इन्द्रवन्तो देवास्तान् नियमयतीति। ग्राम्यारण्येषु पशुषु गतस्तन्नामा। पान्ति शंशीलाश्चेति। पशति बध्नाति स्वमायया जगदिति पशुगतस्तन्नामा। अन्नगतस्तन्नामा। 'अद्यतेऽत्ति च भूतानि तस्मादन्नम्' इति श्रुतेः। हुतशेषे गतोऽमृतनामा। देवानामन्नेऽमृते वा। 'अमृतः शाश्वतः स्थाणुः' इति स्मरणात्। अमृतेषु मुक्तेषु स्थितत्वाच्च। सम्राट्सु आदिराजसु प्रियव्रतादिषु गतस्तन्नामा। 'स्वराळिन्द्रः प्रकीर्त्तितः' इति स्मरणात् स्वःपतिरेव विसर्गलोपेन स्वराट्। 'हस्तिनपुरम्' इतिवत्। तस्मिन् विशेषतः स्थित इति तन्नामा। हिरण्यकशिपुं हत्वा तेनापहृतं स्वर्गसाम्राज्यं स्वयमिन्द्राय हि ददौ। **विराट्** पक्षिराट् गरुडः। तद्गतस्तन्नामा। **विराट्** क्षत्रियो वा। 'भूशक्रः क्षत्रिया विराट्' इति यादव-

प्रकाशः । तद्वतस्तन्नामा । विराजत इति । **विराट्** ब्रह्माण्डं वा । तद्वतः पुरुषनामा । 'द्वितीयं त्वण्डसंस्थितम्' इति स्मरणात् । इत्ययं प्रथमः पादः । भौतप्रपञ्चमयः अग्न्याख्यज्योतिर्म्मयः । अथादित्यज्योतिर्म्मयं द्वितीयं पादमाह । **ऋग्यजुःसामाथर्वरूपः** तद्वतरूपः तैरेव नामभिर्निरूप्यते च । सुष्ठु ईयते वेदैरिति, सूरिभिरेवेयत इति च सूर्य्यनामा सन् य एषोऽन्तरादित्ये **हिरण्मयः पुरुषो** दृश्यते स द्वितीयः पादः । तदुक्तं नृसिंह-पुराणे– 'ध्येयः सदा सवितृमण्डलमध्यवर्त्ती नारायणः सरसिजासन-सन्निविष्टः । केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मय-वपुर्धृतशङ्खचक्रः' इति । अथ चन्द्रज्योतिस्तृतीयः पाद इत्याह– य ओषधीशः नक्षत्राधिपतिः **सोमः** तृतीयपादप्रतिपाद्यः । उत्तमा मा रमा । तया सहितः सोमनामा नरसिंहः । सौम्यश्चायं सतां प्रह्लादादीनाम् । उग्रोऽपि हिरण्यकशिपवताम् ॥

प्रायः **'स हरिः'** इति पाश्चात्यैः प्रक्षिप्तम्, तापनीयायां नारायणोपनिषदि च । **'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्'** इति छन्दः-पूर्त्तिः । पठन्ति चैके तावदेव । **'स ब्रह्मा स शिवः'** इत्यादि महा-नारायणोपषित्प्रतिपाद्यः मूलरूपी नारायण एव चतुर्त्थपादार्त्थः । स एव परमैश्वर्य्यादिन्द्रनामा । **स** एव **अक्षरः** प्रकृतिगतः । अधिकं क्षरतीति, न क्षरतीति, अक्षेषु रमणाच्च । आदिक्षान्तेषु वर्ण्णेषु वाच्यत्वेन रम-णाच्च । अजत्वात्, जगतो निलयत्वात् क्षपणाद् रमणाच्च । स्वयमेव राजत इति **स्वराट्** । एवं ज्ञात्वोपास्ते **सोऽमृतत्वं च गच्छति** ॥ ८ ॥

उग्रं प्रथमस्याऽद्यम् । ज्वलं द्वितीयस्याऽद्यम् । नृसिं तृतीयस्याऽद्यम् । मृत्यु चतुर्त्थस्याऽद्यं साम जानी-यात् । यो जानीते सोऽमृतत्वं च गच्छति । तस्मादिदं

साम यत्रकुत्रचिन्नाचष्टे । यदि दातुमपेक्षते पुत्राय शुश्रूषवे दास्यत्वन्यस्मै शिष्याय वेति स होवाच प्रजापतिः ॥ ९ ॥

अथाक्षरश उपासनम् । **उग्रमि**ति प्रथमपादस्याऽद्यमक्षरद्वयम् । **ज्वलमि**ति **द्वितीयस्य** । **नृसिमि**ति **तृतीयस्य** । **मृत्यु** इति **चतुर्त्थस्य** । तदिदं साम्नो लक्ष्मीनरसिंहस्य रहस्यं नाम **जानीयात्** । कोऽर्थः? उत्थापनादुः । उच्चत्वाद्वा । ग्रहणाद् **ग्रम्** । उं रुद्रं ग्रसतीति **चोग्रम्** । रुद्रगतं च । पापिनो ज्वरयतीति ज्वलयतीति **ज्वम्** । लाययतीति **लम्** । साधून् लासयति, लालयति वा । ज्वलयतीति **ज्वलम्** । आकण्ठं नृरूपमिति **नृ** । तदुपरि सिंहरूपमिति **सिम्** । साधूनां हृदये नृत्यतीति । ताण्डवे शिवान्तर्य्यामी सन् नृत्यतीति वा **नृ** । असाधुषु सिंहतीति **सिम्** । साधूनामभीष्टं सिञ्चतीति च **सिम्** । मारयति म्रियन्तेऽनेनेति वा **मृ** । तीत्यानन्दः । उत्कृष्टानन्दरूपत्वात् **त्यु** । प्रह्लादे मृदुरिति । हिरण्यकशिपावत्युग्र इति **त्यु** । तिमानन्दं यच्छति यमयति चेति **त्यु** । 'तीत्यानन्दः समुदिष्टः' । मृतेरप्युग्रत्वान्**मृत्यु** । एवमुपास्य **अमृतत्वं च गच्छति** । इदं रहस्यतमं यत् **तस्मादिदं** नाचक्षीत । यदि दित्सति सम्प्रदायाद्यविच्छेदाय **शुश्रूषवे** श्रोतुमिच्छते श्रद्धालवे सेवानिरताय **पुत्राय** । ननु सन्न्यासिनः किं कुर्य्युः? तेषां शिष्या एव पुत्रदेशीया इत्याह– तादृशाय **अन्यस्मै** जीवपरयोरन्यत्वज्ञानिने शिष्यत्वेन चिरं परिचिताय वा **दास्यतु** । लोलृट् । 'अनेन प्रसविष्यध्वम्' इतिवत् । दद्यात् । 'दास्यति' इत्यपि क्वचित् । अधिकारिपरीक्षानन्तरं दद्यादिति लृट् । विधिबोधनार्थं लोट् । **इति सहोवाच** स्वयं **प्रजापतिरि**ति तात्पर्य्यार्थम्, आदरजननार्थं च ॥ ९ ॥

क्षीरोदार्ण्णवशायिनं नृकेसरिं योगिद्ध्येयं परमं पदं साम जानीयात्। यो जानीते सोऽमृतत्वं च गच्छति ॥

॥ १० ॥

किं दैवतमित्यस्योत्तरम्– **क्षीरोदार्ण्णवशायिनम्**। क्षीरोदार्ण्णवे तत्रापि श्वेतद्वीपे शेत इति तं **नृकेसरिं** नरसिंहम्। इन्नन्तमिदन्ततयाऽपि पठ्यते पुरातनैः। 'अथ हतयोर्गळिकेश्योः' इति यथा। 'नृकेसरिम्' इति नरहरितीर्त्था अपि। नृके नरशिरसि सहस्रारे सरतीति च। **योगिद्ध्येयं परमं पदं** मुक्तगम्यं **साम** भगवन्तं **जानीयात्**। तेन **अमृतत्वं च गच्छति** ॥ १० ॥

वीरं प्रथमस्याऽद्यार्द्धान्त्यं तंसं द्वितीयस्याऽद्यार्द्धान्त्यं हम्भी तृतीयस्याऽद्यार्द्धान्त्यं मृत्युं चतुर्त्थस्याऽद्यार्द्धान्त्यं साम जानीयात्। यो जानीते सोऽमृतत्वं च गच्छति। तस्मादिदं साम येन केनचिदाचार्य्यमुखेन यो जानीते स तेनैव शरीरेण संसारान्मुच्यते। मोचयति मुमुक्षुर्भवति। (जपान्तेऽनेनैव) शरीरेण देवतादर्शनं करोति। तस्मादिदमेव मुख्यं द्वारं कलौ नान्येषां भवति। तस्मादिदं साङ्गं साम जानीयात्। यो जानीते सोऽमृतत्वं च गच्छति ॥ ११ ॥

प्रथमपादस्य आद्यार्द्धम्– उग्रं वीरमिति। तस्यान्त्यं **वीरमि**त्यक्षरद्वयमेको मन्त्रः। द्वितीयस्याद्यार्द्धं 'ज्वलन्तं स' इति। तस्यान्त्यं **'तंस'** इति

तृतीयस्याऽद्यमर्द्धं 'नृसिंहं भी' इति । तस्यान्त्यं **'हम्भी'** इति । तुरीयस्याद्यार्द्धं मृत्युमृत्युमिति । तस्यान्त्यम्– **'मृत्युम्'** इति । **आचार्य्यमुखेनेति** । गुरूपदेशादृते न मन्त्राः फलदाः । प्रत्युतानर्थहेतवश्चेति जागरयति । **तेनैव** चरम**शरीरेण मुच्यते शिष्यः** । जीवन्मुक्तो वा भवति । **मोचयति** च गुरुः । स्वयमेव वा शिष्य आत्मानं भवबन्धेन **मोचयति** । **यो मुमुक्षुर्भवति** तादृशमन्यं वा **मोचयति** । **जपान्ते च** जाग्रत्येव नरसिंहं पश्यति । तदिदं **मुख्यं** मोक्षद्वारं **कलौ** । **अन्येषाम्,** नारसिंहानुष्टुभमन्त्रराजविमुखानां **न** देवतादर्शनं **भवति** । **साङ्गं** अङ्गमन्त्रसहितं **साम** मुख्यमन्त्रम् । एवमङ्गदेवतापरिवृतम् । ब्रह्मवायुशिवाहीशविषैः शक्रादिकैरपि सेव्यमानमित्यर्थः । **साम** लक्ष्मीनरसिंहम् । **सोऽमृतत्वं च गच्छति** । अथाङ्गमन्त्रार्थः– विक्रान्तं रूपं **वीरम्** । विशिष्टं विष्णुरूपं सर्वप्रेरकं च । विं पक्षिराजमीरयति । वीरत्वाद् **वी** । रमणाद् **रम्** । वी गतिप्रजनकान्त्यसनखादनेषु । सर्वगतत्वात् जगत्प्रजननाद् **वी** । सत्यसङ्कल्पत्वाद् **वी** । सर्वप्रेरकत्वाद् **वी** । सर्वात्तृत्वाच्च **वी** । रमयतीति रात्यभीष्टमिति **रम्** । रावयतीति **रम्** । राययतीति **रम्** । राहयति रसयतीति **रम्** । ततत्वात् **तम्** । सारत्वात् **स** । ऋतं वेदं वाच्यत्वेन सरतीति **स** । ततं प्रकृतिं सरतीति **तंस** । **तं सः** इत्यादिसर्वविभक्तिप्रतिपाद्यः । सर्वात्तृत्वात् सर्वज्ञत्वाच्च **हम्** । दुर्ज्जनभीषणत्वाद् **भी** । हं जीवजातं बिभर्त्तीति **हम्भी । हम्,** यो जहाति भगवन्तम्, तं दुर्ज्जनं प्रति भीषण इति **हम्भी** । बिन्दुरवधारणे वा । तस्यैव भीषणमित्यर्थः । अनेन म्रियन्त इति मृतिः । उग्रत्वादुम् । उं शिवमपि मारयतीति **मृत्युम्** ॥ ११ ॥

ॐ ऋतं सत्यं परं ब्रह्म पुरुषं
नरकेसरिविग्रहं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम् ।
उमापतिः पशुपतिः पिनाकी ह्यमितद्युतिः ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः । यो वै यजुर्वेदवाच्यस्तं साम जानीयाद् । यो जानीते सोऽमृतत्वं च गच्छति ॥ १२ ॥

मन्त्रोऽयं व्याख्यातोऽनुव्याख्याने–

'ऋतं सत्यं परं ब्रह्मेत्याद्युद्देश्यद्वितीयका ।
'विभक्तिरूर्ध्वरेतादिः प्रथमा रुद्रगोचरा ॥

'तस्माद् विष्णुं परं ब्रह्म प्रति रुद्रो व्रते स्थितः ।
'ऊर्ध्वरेता इति ह्येव श्रुत्यर्थोऽवसितो भवेत् ॥

'ऋतं सत्यं परं ब्रह्म प्रति विष्णुं सदाशिवः ।
'ऊर्ध्वरेता ध्यायति ह शङ्करो नीललोहितः' ।
'इत्यर्थमेतमेवाऽह नीलग्रीवश्रुतिः परा' ॥
(अनु.१.१.१६८-१७०)

'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
'विष्ण्वाख्यमुक्तमन्यत्र ह्यूर्ध्वरेतं च तत् प्रति ।
'विरूपाक्षाख्यमवरं ब्रह्मोक्तं तद्व्रते स्थितम् ॥

'समानाधिकृतत्वं चेदुत्तरं नीललोहितम् ।
'कृष्णपिङ्गलरूपेण पुनरुक्तं भविष्यति ॥

'ब्रह्माधिपतिरित्यत्र तापनीयश्रुतौ पुरः ।
'स्वरितब्रह्मशब्दान्तं बहुव्रीहित्वमेष्यति' इति च ॥
(अ.१.पा.१.१६२–६१)

तथाचायं मन्त्रार्थः– ऋतं यथार्थज्ञानरूपम् । निर्विकारम् । सर्ववेदैरधिगतम् । सत्यं सत्यजगन्निर्म्मातृ । सर्वनियामकम् । परं ब्रह्म नारायणाख्यम् । 'तदेवर्त्तं तदु सत्यमाहुः । तदेव ब्रह्म परमं कवीनाम्' इति नारायणश्रुतिः । पुरुषं पूर्णषड्गुणं पुरुषसूक्तप्रतिपाद्यम् । प्रह्लादानुग्रहाय हिरण्यकनिग्रहाय च धृतनरकेसरिविग्रहम् । 'नारसिंहवपुः श्रीमान्' इति विष्णुसहस्रनामसु श्रूयमाणं तन्नामकं रूपान्तरमप्यस्ति । कृष्णवर्ण्णं हिरण्यकशिपुदृष्टम् । पिङ्गलं पीतरक्तं स्फुटितस्वर्ण्णवर्ण्णं प्रह्लाददृष्टम् । अथच कृष्णः क्वचिदवतारेषु नीलवर्ण्णः । क्वचिदवतारेषु पिङ्गलः ईषद्रक्तः, स्फुटितहेमवर्ण्णः । 'कर्बुरः शुक्लहरित आरुः स्यात् कृष्णपिङ्गलः' इति यतिर्य्यादवप्रकाशः । 'कृते शुकश्चतुर्बाहुः' (भाग.११.५.२१), 'त्रेतायां रक्तवर्ण्णोऽसौ' (२४), 'द्वापरे भगवान् श्यामः' (२७), 'कृष्णवर्ण्णं कलौ कृष्णम्' (३२) इत्यादि च भागवते । अथच कृष्णपिङ्गलः मेघश्याम इत्यर्थः । 'कालघनालीकर्बुरकायः' इत्याचार्य्यप्रयोगात् । पूर्वार्द्धं द्वितीयान्तम् । परब्रह्मविशेषणत्वात् नपुंसकं च । तादृशं विष्ण्वाख्यं **परं ब्रह्म** प्रति, तदुद्दिश्य, **ऊर्ध्वरेतं** ब्रह्मचर्य्यव्रते स्थितम् । **विरूपाक्षं** त्रिनेत्रम्, कण्ठे नीलम् । इतरत्र लोहितम् । उग्रत्वाच्चक्षुषि वा । 'नीलश्चासौ लोहितश्च कण्ठे जटासु च' इत्यन्ये । सर्वतः शारवर्ण्णं वा । 'नीलपीतारुणः शारः जेणालो नीललोहितः' इति च । तादृशं शङ्करास्यं अवरं ब्रह्मेत्युत्तरमन्त्रे प्रथमान्तम् । प्रथमवाक्ये तिस्रो याजुष्योऽनुष्टुभः । उत्तरो मन्त्र आर्च्ची अनुष्टुप्– ऊर्ध्वरेता विरूपाक्षः शङ्करो नीललोहितः ।

उमापतिः पशुपतिः पिनाकी ह्यमितद्युतिरिति । पूर्वार्द्धेऽपरब्रह्म-विशेषणतया आगतानि नपुंसकानि पदानि उत्तरार्द्धे शिवपरतया पुँल्लिङ्गेनोपसंहरति– **उमापतिरि**त्यादि। पूर्वोत्तरयोर्भिन्नविषयत्वद्योतनायैव छन्दो भेदः । रुद्रोपास्यो रुद्रान्तर्य्यामी नरसिंहो देवतेत्यर्थः । अन्यथा **कृष्णपिङ्गलमि**त्यनेन **नीललोहितमि**ति पुनरुक्तं स्यात् । समाख्यया हि श्रुत्यर्थं निर्ण्णयन्ति । नीलग्रीवश्रुतिराथर्वणी चात्र समाख्या भवति–

> 'ऋतं सत्यं परं ब्रह्म प्रति विष्णुं सदाशिवः ।
> 'ऊर्ध्वरेता ऊर्ध्वायति ह शङ्करो नीललोहितः' इति ॥

मनोमानित्वात् **सर्वविद्यानामीशानः** शिवः । लिङ्गमानित्वात् **सर्वभूता-नामीश्वरः** । मुख्यतो नरसिंहस्यैवैतानि विशेषणानि । 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ' इति हि भगवद्वचनम् ॥

ब्रह्मा चतुर्म्मुखः पितृत्वेनाधिपतिर्य्यस्य स शिवः **ब्रह्माधिपतिः** । ब्रह्मा सर्वजीवाधिपतिर्य्येनेति नरसिंहो **ब्रह्माधिपतिः** । ब्रह्म चायमधिपतिश्चेति वा । **ब्रह्मणः** समस्तवेदस्या**धिपति**र्नरसिंहः । विशिष्य याजुषस्य शतरुद्रियाख्यस्य **ब्रह्मणोऽधिपतिः** शिवः ॥

यो वै शिवान्तर्य्यामितया यजुर्वेदे मुख्यतः शतरुद्रियादिना वाच्यः स हि साम लक्ष्मीनरसिंह एवेति **जानीयात्** । **यो जानीते सोऽमृतत्वं गच्छति** ॥ १२ ॥

महा प्रथमान्तार्द्धस्याऽद्यम् । र्वतो द्वितीयान्ता-र्द्धस्याऽद्यम्, षणं तृतीयान्तार्द्धस्याऽद्यम्, नमा चतुर्त्थान्तार्द्धस्याऽद्यं साम जानीयाद् यो जानीते

सोऽमृतत्वं च गच्छति । तस्मादिदं सच्चिदानन्दमयं परं ब्रह्म । तमेवं विद्वानमृत इह भवति । तस्मादिदं साङ्गं साम जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ १३ ॥

प्रथमचरणस्य **अन्तार्द्धस्य** महाविष्णुमित्यस्य **आद्यम**क्षरद्वयं **'महा'** । द्वितीयस्य **अन्तार्द्धस्य आद्य**मक्षरद्वयं **'र्वतो'** इति । तृतीयस्य **अन्तार्द्धस्य आद्य**मक्षरद्वयं **षणमि**ति । तुरीयस्या**न्तार्द्धस्य आद्यम**क्षरद्वयं **नमा** इति । कोऽर्थः? अकयप्रविसम्भूमसखहा विष्णुवाचकाः । तेन **म** इति **ह** इति **अ** इति च भगवतस्त्रीणि नामानि सहितानि **महा** । ज्ञानरूपत्वा**न्म** । दोषहानात् **ह** । सर्वविलक्षणत्वात् सर्वाधिकत्वात् **अ** । **र्वतो** । रेफस्य ऋभावः अल्लोपेन । तेन 'रवतो' इति पदम् । रवे वाच्यत्वेन तताः रवताः । तेषूत्तमः **रवतो** । परस्मादुत्तमं परो इतिवत् । ऋ इति स्वरुच्यते । तत्र वसन्तः ऋवाः । तेषु ततश्च उत्तमश्च **र्वतो** । **ऋ** इति ऋतम्भरः **व** इति **वरः** । **त** इति तारः । **ओ** इत्योजोभृत् । प्रणेतृत्वात् बलरूपत्वाच्च **षणम्** । विष्णुशब्दार्थः । 'णकारो बलं षकारः प्राण आत्मा' इति श्रुतिः । **नमा** नम्येष्वधिकः । प्रथमार्थे द्वितीया– **न मा** नाहं षणम् । किन्तु मम स्वामी । **तस्मादिदं साम** मन्त्रप्रतिपाद्यं लक्ष्मीनरसिंहाख्यं रूपं **सच्चिदानन्दमयं परं ब्रह्मै**व पुरुषसूक्तप्रतिपाद्यम् । तत्र पुरुशसूक्तसमाख्यामाह– **तमेवं विद्वानमृत इह भवति** । **तस्मात् तमेव**मेव **विद्वानमृतो भवति** । **साङ्गं** द्व्यक्षराङ्गमन्त्रसहितम्, पूर्वोक्ताङ्गमन्त्रसहितं च । अङ्गदेवतासहितं परदैवतं च **साम** ॥ १३ ॥

विश्वसृज एतेन वै विश्वमिदमसृजन्त । यद् विश्व-मसृजन्त तस्माद् विश्वसृजः । विश्वमतेनानु प्रजा-यते । ब्रह्मणः सलोकतां सार्ष्टितां सायुज्यं यन्ति । तस्मादिदं साङ्गं साम जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ १४ ॥

विश्वसृजो ब्रह्मादयः **एतेन** मन्त्रेण करणेन, **एतेन** मन्त्रप्रतिपाद्येन लक्ष्मीनरसिंहेन कर्त्रा, तत्प्रसादेनेति यावत्, **विश्वमिदमसृजन्त** । तेन भगवतोऽन्तरङ्गप्रिया बभूवुरित्यात्मनेभाषा । **यस्माद्** भगवदङ्गत्वेन **विश्वमसृजन्त तस्मात्** तेऽपि **विश्वसृज** उच्यन्ते । वस्तुतस्तु तेष्वाविष्टेन **एतेन** भगवतै**वानु** स्वेच्छानुसारेण सर्वं **प्रजायते** । तस्मात् मुख्यतः स एव विश्वसृजः । बहुरूपत्वाद् बहुवचनम् । य एवं जानीयुस्ते भगवतः सालोक्यम्, इच्छामात्रेण अपेक्षितप्राप्तिं **सार्ष्टिताम्, सायुज्यं च यान्ति** । न सर्वे सर्वम् । यस्य यद् योग्यं स तत् । अन्ततः स्वयोग्य**ममृतत्वं गच्छति** ॥ १४ ॥

विष्णुं प्रथमान्त्यम्, मुखं द्वितीयान्त्यम्, भद्रं तृतीया-न्त्यम्, म्यहं चतुर्त्थान्त्यम् (साम जानीयाद् यो जानीते सोऽमृतत्वं च गच्छति) योऽसौ वेद यदिदं किञ्चाऽत्मनि ब्रह्मण्येवाऽनुष्टुभं जानीयाद् यो जानीते सोऽमृतत्वं च गच्छति स्त्रीपुंसयोर्वा । य इहैव स्थातुमपेक्षते तस्मै सर्वैश्वर्य्यं ददाति । यत्रकुत्रापि म्रियते देहान्ते देवः

परमं ब्रह्म तारकं व्याचष्टे येनासावमृतीभूत्वा सोऽमृतत्वं च गच्छति ॥ १५ ॥

प्रथमपादस्यान्त्यमक्षरद्वयं **विष्णुम्** । द्वितीयस्य **मुखम्** । तृतीयस्य **भद्रम्** । तुरीयस्य **म्यहम्** । विष्णुरेव **विष्णुम्** । बिन्दुरवधारणे । **मुखं** प्रमुखम् । सर्वदेवोत्तमम् । **भद्रं** मङ्गलानां च मङ्गलम् । **म्यहम्** । मित्वा न जहातीति अहेयं ज्ञानरूपं चेति **म्यहम्** । सर्वहेयजगद्भिन्नत्वेन मीयत इति **म्यहम्** । मिनुते क्षिपतीति **मि** । दोषविरुद्धगुणात्मकत्वात् सर्वभिन्नत्वाच्च **अ** । दोषहानाद् **हम्** । **योऽसौ** सर्वं **वेद** तस्मिन् सर्वज्ञे सर्वात्मनि **ब्रह्मण्येव** वाचकत्वेनावस्थिता**मानुष्टुभं जानीयात्** । अनुष्टुप्-प्रतिपाद्यं जानीयात् । **आनुष्टुभं** वा मन्त्रम् । **स्त्रीपुंसयो**र्यः कोऽपि स्यात् । स्त्रीजीवो वा पुञ्जीवो वा । 'स्त्रीशूद्राय नेच्छन्ति' इत्युक्तस्य स्पष्टीकरणमिदम् । **सोऽमृतत्वं गच्छत्ये**व । **य इहैव** भूमावधिकसाधनार्थं **स्थातुमपेक्षते तस्मै** सर्वप्राप्तिसामर्थ्यमिहैव **ददाति** भगवान् । देहत्यागकाले स्वयं भगवांस्तस्मै तारकमन्त्रमुपदिशति । **येन असौ** प्राणे गतः प्राणोपासकः **अमृतीभूत्वा अमृतत्वं च गच्छति** । तदुक्तम्– 'विमुक्तश्च विमुच्यते' । **अमृतीभूत्वा** मरणरहितो भूत्वा **अमृतत्वं** आनन्दरूपत्वं **गच्छती**ति वा ॥ १५ ॥

तस्मादिदं साम मद्ध्यगं जपति । तस्मादिदं सामाङ्गं प्रजापतिस्तस्मादिदं सामाङ्गं प्रजापतिर्य्य एवं वेदेति महोपनिषत् । य एतां महोपनिषदं वेद स कृतपुरश्चरणोऽपि महाविष्णुर्भवति महाविष्णुर्भवति ॥ १६ ॥

॥ इति प्रथमोपनिषत् ॥

—०—

तस्मादिदं **साम** स्वर**मद्ध्यगं** तारमद्ध्यगतं आद्यन्तयोरोङ्कारसम्पुटितं जपेत् । अपि च स्वरोऽपि मन्त्रमद्ध्यगत इति रहस्यम् । द्वावेवात्र स्वरौ अम् इति उम् इति । तयोः संयोग एव ह्योङ्कारः । **सर्वतो** इत्योकारः **मुखम्** इति मकार इति च । **तस्मादिदं साम** नृसिंहानुष्टुभं नाम, द्व्यक्षराः षोडशाङ्गमन्त्राश्च । साम चाङ्गानि च **सामाङ्गम्** । **प्रजापतिरे**व । प्रजापतेर्नरसिंहस्य नामान्येव । देवतामन्त्रयोरभेदोपचारो वैदिक-सम्प्रदायसिद्धः । **य एवं वेद** सोऽपि स्वावरप्रजापतिर्भवति । अथच मुख्यत एतन्मन्त्रज्ञः मुख्यप्राणः स्वयं **प्रजापतिर्ब्रह्मा भवति** । इतीयं महती तापनीयोपनिषत् । साधकैर्निरन्तरं चिन्तनीया रहस्यविद्या । **य एतां वेद** स भगवत्पुरः निरन्तरं कृतमन्त्रपुनश्चरणः स **महाविष्णुर्भवति** । तद् यथा वेदज्ञो वेदमूर्त्तिरित्युच्यते । द्वितीयार्थे प्रथमा वा । महाविष्णुं भवति प्राप्नोति । भू प्राप्तौ । सेयं गुह्यभाषा वेदेषु । प्रथमोपनिषत्समाप्तिसूचनी द्विरुक्तिः ॥ १६ ॥

—०—

अथ द्वितीयोपनिषत्

देवा हवै मृत्योः पाप्मभ्यः संसाराच्चाबिभयुः । ते प्रजापतिमुपाधावन्। तेभ्य एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रायच्छत्। तेन वै ते मृत्युमजयन्। पाप्मानं चातरन्। संसारं चातरन्। तस्माद् यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात् स एतं मन्त्रराजमानुष्टुभं प्रतिगृह्णीयात् स मृत्युं जयति स पाप्मानं तरति स संसारं तरति ॥ १ ॥

मन्त्रमहिमानं ख्यापयन्तीमाख्यायिकामाह । अर्त्थवादोऽयं पुराकल्पः । मृत्योर**ज्ञानात्,** तन्निमित्तेभ्यः **पाप्मभ्यः**, तन्निमित्तात् **संसाराच्च अबिभयुः** । तेषां प्रजापतिः चतुर्म्मुखः **एतं मन्त्रराजं प्रायच्छत्** उपदिदेश । तेन मन्त्रेण जप्तेन ते मृत्युमतीत्य अमरा बभूवुः, भगवज्ज्ञानिनश्च । पाप्मनः **संसारं चातरन्** । वर्त्तमानकालेऽपि यः कश्चिदधिकारी एतं मन्त्रराजं योग्यगुरुमुखात् **प्रतिगृह्णीयात्** सोऽपि तथा भवति ॥ १ ॥

तस्य हवै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिरृग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः साम्नः प्रथमः पादो भवति । द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्य्यजुर्वेदो विष्णू रुद्रास्त्रिष्टुप् दक्षिणाग्निः साम्नो

द्वितीयः पादो भवति। तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्र आदित्या जगत्याहवनीयः साम्नस्तृतीयः पादो भवति । याऽवसानेऽस्य चतुर्त्थ्यर्द्धमात्रा सा सोमलोक ओङ्कारः सोऽथर्वणैर्म्मन्त्रैरथर्ववेदः संवर्त्तकोऽग्निर्म्मरुतो विराडेकर्षिर्भास्वती सा साम्नश्चतुर्त्थः पादो भवति ॥ २ ॥

सर्ववेदमूलस्य, सर्वमन्त्रादौ पठनीयस्य नृसिंहानुष्टुभोऽङ्गमन्त्रस्य च प्रणवस्य महिमानमाह– **तस्य हवै प्रणवस्य** । **वायि**त्यस्य सर्वशास्त्रप्रसिद्धत्वमाह । **हे**ति महिमातिशयं स्वदते विस्मयते च । त्र्यक्षरः प्रणवः । त्रीन् लोकान्, त्रीन् वेदान्, त्रीनग्नीन् मुखत आह । तद्गतं नरसिंहमित्येतत् । भूरित्यवनिः– **अ** । तद्गतो नरसिंहः । भुव इत्नुपरमन्तरिक्षम्– **उ** । सर्वोच्चो नरसिंहः । 'मानं ज्ञानं लयश्चैव' इति वचनात् ज्ञानप्रधानत्वात् सुवरिति **म्**– स्वर्गलोकः । मारको नरसिंहः । एवं लोकगतं भगवन्तमोङ्कार आह । एव**मृग्वेद अकारः** । **यजुर्वेद उकारः** । **सामवेदो मकारः** । एवं वेदत्रयगतभगवन्तं प्रणव आह । तदेतदाह– सर्वाभिः अर्च्चन्ती-**त्यृग्भिरुप**लक्षितः समग्र **ऋग्वेद** इति । एवं **यजुर्भि**र्य्यजनसाधनैर्म्मन्त्रैरुपलक्षितो **यजुर्वेद** इति । **सामभिः** प्रगीतमन्त्रैरुपलक्षितः **सामवेद** इति । एवं सृष्टिस्थितिसंहारकृत् भगवान् त्र्यक्षरार्थ इत्याह– **ब्रह्मा विष्णू रुद्र** इति । स्रष्टा ब्रह्मान्तर्य्यामी अज इति **अ** । पाता स्वयं विष्णुः सर्वोच्च इति **उ** । लयकृद् रुद्रान्तर्गतो मारयतीति **म** । एवमग्निषु भूस्थानो **गार्हपत्यो**ऽकारः । अन्तरिक्षस्थानो **दक्षिणाग्निः** उकारः । स्वःस्थान **आहवनीयो** मकारः । अग्र्यन्तर्गतस्त्रिरूपो नरसिंहः प्रणवार्थः । एवं

प्रातःसवनदेवता **वसवो**ऽग्रे पूज्यत्वादकारार्थः । मद्ध्यन्दिनसवनदेवता **रुद्रा** उग्रत्वादुकारार्थः । सायंसवनदेवता **आदित्या** ज्ञानप्रधानत्वान्मकारार्थः । तदन्तर्य्यामी नरसिंहस्त्र्यक्षरार्थः । वसुसमानसङ्ख्यत्वाद्ष्टाक्षरपादा **गायत्री** प्रातःसवनच्छन्दोऽ**कारः** । रुद्रसमसङ्ख्यत्वादेकादशाक्षरपादा **त्रिष्टुप्** मद्ध्यन्दिनच्छन्द **उकारः** । आदित्यसमसङ्ख्यत्वाद् द्वादशाक्षरा **जगती** सायंसवनच्छन्दो **मकारः** । तत्तच्छन्दोन्तर्य्यामी नरसिंहः प्रणवार्थः इत्यपूर्वोऽयं प्रणवमहिमा । त एते नृसिंहानुष्टुभस्त्रयः पादाः ।

अथ नादार्थभूतं चतुर्थपादार्थमाह– **याऽवसानेऽस्य चतुर्थ्यर्द्धमात्रा । ओङ्कार** इति नाद इत्यर्थः । पृथगुच्चारासम्भवात् । सुवर्ल्लोकस्य सर्वोच्चो भागः **सोमलोकः** । चन्द्रलोको वायुलोको वा । अथर्वमन्त्रैरुपलक्षितस्समग्रोऽ**थर्ववेद**श्चतुर्थपादार्थः । **संवर्त्तको**ऽ**ग्निः** प्रळयाग्निः । पञ्चाश**न्मरुतः** । मुख्यतः प्रधानमरुत् पञ्चाशः । गायत्र्या दशपदवेद्यः दशावतारो भगवान् दशाक्षरेण विराट्च्छन्दसा प्रतिपाद्य इति तच्छन्दः । **एकर्षि**श्चोप्यथर्वणामग्निरिति विशिष्य चतुर्थपादवेद्यः । एवं **भास्वती** भगवच्छक्तिः प्रणववेद्या नृसिंहानुष्टुभवेद्या च । एवं या प्रणवस्य चतुर्थी मात्रा **सा साम्नो** नृसिंहानुष्टुभस्य **चतुर्थः पादो भवति** मृत्युमृत्युं नमाम्यहमिति ॥ २ ॥

अष्टाक्षरः प्रथमः पादो भवत्यष्टाक्षरास्त्रयः पादा भवन्त्येवं द्वात्रिंशदक्षराणि सम्पद्यन्ते । द्वात्रिंशदक्षरा वा अनुष्टुब् भवत्यनुष्टुभा सर्वमिदं सृष्टम् ॥ ३ ॥

अष्टावक्षराणि विश्वादीनि यत्र प्रतिपाद्यन्ते **सोऽष्टाक्षरः प्रथमः पादः** । पञ्चभूतानि पञ्च तन्मात्राः दशेन्द्रियाणि चत्वार्य्यन्तःकरणानीति

चतुर्विंशतितत्वगतानि चतुर्विंशतिरक्षराणि रूपाणि पादत्रयगतानि । एवं द्वात्रिंशत्तत्वगतः द्वात्रिंशदक्षरो भगवान् । **द्वात्रिंशदक्षरा चानुष्टुप्** । 'स्वेच्छानुरोधेन स्तोभनात् अनुष्टुप्' इति चोक्तम् । तेन नरसिंह एव मुख्यतोऽनुष्टुप् । तस्मा**दनुष्टुभा सर्वमिदं सृष्टम्** ॥ ३ ॥

तस्य हैतस्य पञ्चाङ्गानि भवन्ति । चत्वारः पादाश्चत्वार्य्यङ्गानि भवन्ति । सप्रणवं सर्वं पञ्चमं भवति । हृदयाय नमः । शिरसे स्वाहा । शिखायै वषट् । कवचाय हुम् । अस्त्राय फडिति । प्रथमं प्रथमेन युज्यते । द्वितीयं द्वितीयेन । तृतीयं तृतीयेन । चतुर्त्थं चतुर्त्थेन । पञ्चमं पञ्चमेन व्यतिषजति । व्यतिषक्ता वा इमे लोकाः । तस्माद् व्यतिषक्तान्यङ्गानि भवन्ति ॥ ४ ॥

पञ्चाङ्गन्यासेन मन्त्रगुप्तिमाह– **तस्य हैतस्य** । **पञ्चाङ्गानि** अङ्गन्यासमन्त्रा **भवन्ति** । नरसिंहानुष्टुभस्य **चत्वारः पादा**श्चत्वारोऽङ्गमन्त्राः । **सप्रणवं** पादचतुष्टयं पञ्चमन्यासमन्त्रः । अङ्गान्याह– **हृदयाय नमः** । प्रथममङ्गं **प्रथमेन** पादेन **युज्यते** । उग्रं वीरं महाविष्णुं हृदयाय नमः । प्रथमपाद-प्रतिपाद्याय हृद्गताय नरसिंहाय सर्वमर्प्पितं न मम किञ्चिदिति । द्वितीया चतुर्त्थर्त्थे– उग्राय वीराय महाविष्णवे हृदयाय नम इत्युक्तं भवति । **द्वितीयं द्वितीयेन**– ज्वलन्तं सर्वतोमुखं शिरसे स्वाहा । उत्तमाङ्गे श्रयणाच्छिरःशब्दवाच्याय सर्वं मदीयं स्वाहा न ममेति स्वत्वत्याग-पूर्वकं जुहोमीति । स्वत्वस्य आ समन्ताद् हानं हि स्वाहा । ज्वलते सर्वतोमुखाय शिरसे स्वाहा । **तृतीयं तृतीयेन**– नृसिंहं भीषणं भद्रं शिखायै वषट् । ज्ञानशिखायां खं ज्ञानमयः सन् शेत इति शिखा

विद्यादेवतागतः स्त्रीरूपो नरसिंहः । वं ज्ञानम् । ष इति प्राणनम् । प्रेरणमित्येतत् । ज्ञानप्रेरणार्थं स्वात्मसमर्प्पणं वषडित्युच्यते । वहते-र्डषट्प्रत्यय इति वैयाकरणाः । तेष्वप्रत्यया वयम् । नृसिंहाय भीषणाय भद्राय ज्ञानशिखागताय मदीयं ज्ञानजातं सुपथा नयेति समर्प्यते । **चतुर्थं चतुर्थेन** । मृत्युमृत्युं नमाम्यहम् कवचाय हुम् । मम रक्षाकवचभूतं मृत्युमृत्युं नरसिंहं नमाम्यहम् । नत्वा प्रार्थये मदीयज्ञानपरिपन्थिनो हुङ्कारेण निरस्येति । **अस्त्राय फडिति पञ्चमं पञ्चमेन** सप्रणवेन समग्रेण मन्त्रेण व्यतिषजति । शत्रूणां निरसनेन त्रायत इत्यस्त्रं भगवान् । समन्त्रं नत्वा स प्रार्थ्यते फडिति उच्चाटयारीनिति । यथा **व्यतिषक्ता** एव **लोकाः** प्रजा वा परस्परभावनया फलदाः तथा मन्त्रव्यतिषक्ता एवाङ्गदेवता उक्तफलदा भवन्ति ॥ ४ ॥

ओमित्येदक्षरमिदं सर्वम् । तस्मात् प्रत्यक्षरमुभयत ओङ्कारो भवति । अक्षराणां न्यासमुपदिशन्ति ब्रह्म-वादिनः ॥ ५ ॥

ओमित्येतदक्षरं भगवद्रूपं **सर्वं** परिपूर्ण्णम् । तस्मादोङ्कारोऽपि सर्ववेद-मूलत्वात् परिपूर्ण्णमक्षरम् । ततश्च प्रत्यक्षरमाद्यन्तयोरोङ्करणेन द्वात्रिंश-न्मन्त्रा भवन्ति । इदमुपलक्षणम् । मन्त्रत्वाय प्रत्यक्षरं बिन्दुसंयोजनेन च । ॐ उं ॐ । ॐ ग्रं ॐ इत्यादि । यथा पञ्चाङ्गानां न्यासं तथा द्वात्रिंशदक्षराणामपि प्रणवसम्पुटितानामङ्गेषु **न्यासं** कर्त्तव्य**मुपदिशन्ति** वेदज्ञाः । द्वात्रिंशदक्षरवाच्यानां तावतां भगवद्रूपाणां चाङ्गेषु न्यासम् । तथाहि द्वात्रिंशदङ्गन्यासक्रमः– ॐ उं ॐ पादयोः (१) । ॐ ग्रं ॐ जानुनोः (२) ॐ वीं ॐ ऊर्वोः (३) । ॐ रं ॐ उपस्थमूले (४) ।

ॐ मं ॐ उपस्थे (५) । ॐ हां ॐ पृष्ठे (६) । ॐ विं ॐ देहवामपार्श्वे (७) । ॐ ष्णुं ॐ दक्षपार्श्वे (८) । ॐ ज्वं ॐ तुन्दे (९) । ॐ लं ॐ नाभौ (१०) । ॐ तं ॐ हृदि (११) । ॐ सं ॐ वामस्तने (१२) । ॐ र्वं ॐ दक्षस्तने (१३) । ॐ तों ॐ उरसि (१४) । ॐ मुं ॐ वामबाहौ (१५) । ॐ खं ॐ दक्षबाहौ (१६) । ॐ नृं ॐ क्रोडे (१७) । ॐ सिं ॐ वामांसे (१८) । ॐं हं ॐ दक्षांसे (१९) । ॐ भीं ॐ कण्ठे (२०) । ॐ षं ॐ कण्ठवामपार्श्वे (२१) । ॐ णं ॐं दक्षपार्श्वे (२२) । ॐ भं ॐं ककुदि (२३) । ॐ द्रं ॐ आस्ये (२४) । ॐ मृं ॐ वामगण्डे (२५) । ॐ त्युं ॐं दक्षगण्डे (२६) । ॐ मृं ॐ नासायाम् (२७) । ॐ त्युं ॐ श्रोत्रे (२८) । ॐं नं ॐं नेत्रे (२९) । ॐ मां ॐ ललाटे (३०) । ॐ म्यं ॐ अळिके (३१) ॐ हं ॐ मूर्द्धनि (३२) इति ॥ ५ ॥

तस्य हवा उग्रं प्रथमं स्थानं जानीयाद् यो जानीते सोऽमृतत्वं च गच्छति । वीरं द्वितीयं स्थानम् । महाविष्णुं तृतीयं स्थानम् । ज्वलन्तं चतुर्त्थं स्थानम् । सर्वतोमुखं पञ्चमं स्थानम् । नृसिंहं षष्ठं स्थानम् । भीषणं सप्तमं स्थानम् । भद्रमष्टमं स्थानम् । मृत्युमृत्युं नवमं स्थानम् । नमामि दशमं स्थानम् । अहमेकादशं स्थानं जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ ६ ॥

द्व्यक्षरमन्त्रप्रतिपाद्यः षोडशात्मा नरसिंह उक्तः । अक्षरप्रतिपाद्यो द्वात्रिंशदात्मा च । इदानीमेकादशरुद्रेषु सन्निहितः एकादशपदवाच्य एकादशात्मा नरसिंह इत्याह– **तस्य हवायि**ति । उग्राख्यं रूपं प्रथममुपासनास्थानम् । एवं दशमं रूपं नमामिनामकम् । कथं नमामि? अमितानि नमनानि यस्य । सकललोकनमस्कृतमित्यर्थः । एवमेव एकादशं रूपमहंनामकम् । अहङ्कारमानिप्रधानरुद्रगतम् । अहेयत्वादहंनामकम् । एतेनाहंशब्दो भगवत्येव मुख्य इति सूचयति । **यो जानीते सोऽमृतत्वं च गच्छती**त्याद्यन्तयोर्ग्रहणं सर्वत्रान्वयसूचनार्थम् ॥ ६ ॥

एकादशपदा वा अनुष्टुब् भवति । अनुष्टुभा सर्वमिदं सृष्टमनुष्टुभा सर्वमिदमुपसंहृतम् । तस्मात् सर्वमानुष्टुभं जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ ७ ॥

एकादशपदात्मकमिदं नारसिंहमनुष्टुप्छन्दः । एकादश पदानि रूपाणि यस्य सोऽनुष्टुम्नामा नरसिंहः । तेन **अनुष्टुभा सर्वमिदं सृष्टम्** । **सर्वमुपसंहृतं** च । **तस्मात् सर्वमानुष्टुभं** अनुष्टुम्नामकभगवदधीनं **जानीयात्** । एवमनुष्टुप्-करणेन **सर्वमानुष्टुभं** भवति । तथाहि चतस्रो गायत्र्यस्तिस्रोऽनुष्टुभः । अष्टावुष्णिहः सप्तानुष्टुभः । अष्टौ बृहत्यः नवानुष्टुभः । चतस्रः पङ्क्तयः पञ्चानुष्टुभः । अष्टौ त्रिष्टुभ एकादशानुष्टुभो भवन्ति । द्वे जगत्यौ तिस्रोऽनुष्टुभो भवन्ति । एवं सर्वमानुष्टुभं भवति ॥ ७ ॥

देवा हवै प्रजापतिमब्रुवन् अथ कस्मादुच्यत उग्रमिति । स होवाच प्रजापतिः– यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि

भूतान्युद्गृह्णात्यजस्रं सृजति विसृजति वासयत्युद्ग्राह्यत उद्गृह्यते–

स्तुहि श्रुतं गर्त्तसदं युवानं
मृगं न भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो
अन्यं ते अस्मन्निवपन्तु सेनाः ॥

तस्मादुच्यत उग्रमिति ॥ ८ ॥

अथ मन्त्रपदार्थमाह । उग्रमिति कोऽर्थः? उद्ग्रमेव **उग्रम्** । स्वयं उत् सर्वोत्तमः सन् सर्वमन्यन्नियन्तुं **सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः** मनुष्यान् **सर्वाणि** चराचराणि **भूतानि उत्** स्वेदरादुद्धृत्य सृष्ट्यर्थं **गृह्णाति** । कल्पादौ **सृजति** सुरनरतिर्य्यगाद्यात्मना स्थितिकालेऽ**जस्रं विविधं सृजति** । विविधयोनिषु लोकेषु च **वासयति** । ग्राहयद्भिः गुरुभिरुच्चत्वेन **ग्राह्यते** । ज्ञानिभिरुच्चत्वेन **गृह्यत** इति । तत्र श्रुतिसंवादमाह– **स्तुहि श्रुतम्** । गृत्समदस्याऽर्षम्, रुद्रदेवत्यं पञ्चदशर्चं त्रैष्टुभम् (ऋ.२.३३.११) । एकादशाक्षरा त्रिष्टुप् । तत्राप्येकादशो मन्त्रः । एकादशात्मा रुद्रः स्तूयत इति सुश्लिष्टम् । अथर्ववेदे चेयमृक् पठ्यते– (१८.१.४०) । तैत्तिरीयसंहितायामपि (४.५.१०.३) शतरुद्रियान्तर्गतम् । **स्तुहि** श्रुतिशतगीतं हृदय**गर्त्तसदं** नित्य**युवानं** नरसिंहम् । **मृगं न** सिंहमिव **भीमम्** । प्रळये विश्वस्य**ोपहत्नुम्** । अतश्च**ोग्रम्** । हे **रुद्र,** नरसिंहं **स्तवानः** स्तुवन् त्वं तव **जरित्रे** मह्यं मृडय सुखय । **अस्मदन्यं** शत्रुजनं **ते सेना** भूतगणा **निवपन्तु** नाशयन्तु । रुजां द्रवणतो नरसिंहो वा रुद्रः । तदा **स्तवान** इति स्तूयमानः ॥ ९ ॥

अथ कस्मादुच्यते वीरमिति । यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि विरमति विरामयत्यजस्रं सृजति विसृजति वासयति–

यतो वीरः कर्म्मण्यः सुदक्षो
युक्तग्रावा जायते देवकामः ॥

तस्मादुच्यते वीरमिति ॥ ९ ॥

देवा ह्वै प्रजापतिमब्रुवन् इति, सहोवाच प्रजापतिः इति च सर्वत्रान्वेति । विविधमीरयन् रमत इति वीरः । विविधमीरयन् ब्रह्मादीन् रमयति च । रामयति स्वेच्छया रमयतीत्यर्थः । आधिक्येऽधिकम् । आनन्दयाति इतिवत् ॥

अत्र द्वेधाऽनुसन्धानं भवति । नमामीति क्रियापदत्वे उग्रमित्यादि द्वितीयान्तम् । एकादशापि भगवन्नामानीति पक्षे उग्रमित्यादि सर्वं प्रथमान्तम् । उभयसङ्ग्रहाय **उग्रं वीरमि**त्यादि । अत्रापि संवादिनीमृचमाह– **यतो वीर** इति (ऋ.सं.३.४.९) । वैश्वामित्रे त्रैष्टुभे सूक्ते नवमो मन्त्रः । तथाहि समग्रो मन्त्रः–

'तन्नस्तुरीयमध पोषयित्नु देव त्वष्टर्वि रराणः स्वरस्व ।
'यतो वीरः कर्म्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः' इति ॥

आप्रीसूक्तत्वादस्य त्वष्टा देवता । त्वक्ष तनूकरणे । त्वक्षणात् त्वष्टा मुख्यतः सङ्कर्षणो नरसिंहो वा । ततः संहाराङ्गत्वाच्छिवोऽपि त्वष्टा । स इह प्रस्तूयते– हे **देव त्वष्टः**, **तुरीयं** मोक्षदं इहापि सुखपोषदं भव-

दुपास्यं नरसिंहं **नः** अस्मदर्त्थे **रराणः** रममाणः **स्वरस्व** स्तुहि । येन स्वरेण **वीरः** नरसिंहः **जायते** अस्मद्ध्यानगोचरो भवति । कीदृशो नरसिंहः– कर्म्माणि यमयतीति **कर्म्मण्यः** । सर्वशुभाशुभकर्म्मनियामकः । सुखेन शत्रुदमन**दक्षः** । युक्तं तद्योग्यं हिरण्यकशिपुं ग्रसति । तथा भक्तियुक्तं प्रह्लादमवतीति **युक्तग्रावा** । देवैरपि ब्रह्मादिभिः स्वाभीष्टार्थं काम्यत इति **देवकामः** । यस्मादस्यां श्रुतौ नरसिंहो वीर इत्युक्तस्तस्मादस्मिन् मन्त्रे **वीरमुच्यते** ॥ ९ ॥

अथ कस्मादुच्यते महाविष्णुमिति । यस्मात् स्व-महिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि व्याप्नोति व्यापयति स्नेहो यथा पललपिण्डं शान्तमूलमोतं प्रोतमनुव्याप्तं व्यतिषक्तो व्याप्यते व्यापयते–

यस्मान्न जातः परो अन्योऽस्ति
य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया संविदान-
स्त्रीणि ज्योतींषि सचते स षोडशीम् ॥

तस्मादुच्यते महाविष्णुमिति ॥ १० ॥

सर्वेभ्यो महिम्ना महान् विष्णुः महाविष्णुः । 'न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप' इत्यादेः । विष्लृ व्याप्तौ । वेवेष्टि **सर्वान**न्तर्बहिश्च **व्याप्नोति** इति । उच्चत्वादुम् । अवधारणार्त्थे वा बिन्दुः । **व्यापयति** च ब्रह्मादीन् ज्ञानप्रकाशेन । प्रकाशव्याप्तिर्दृष्टान्तेन विब्रियते–

स्नेहो यथा । पललपिण्डं पिण्डितं तिलचूर्ण्णम् । **शान्तमूलं** निवृत्ततुषम् । तत्र यद्यपि स्नेहः ओतप्रोततया **व्यतिषक्तः** । तथा भगवतो व्याप्तिः ज्ञानिनां प्रकाशव्याप्तिश्च । न दृश्यते । तथाऽप्यनुभूयते निष्पिण्डनेन तैलमिव । **व्याप्यते** विशेषेण भक्तैराप्यते । **व्यापयति** च ॥

अत्र याजुषीमृचमाह– **यस्मान्न जातः । यस्मादन्यः** कोऽपि **जातः** महिम्ना **परो नास्ति** । तेन महान् । **यश्च विश्वा भुवनान्या**विश्य विष्णुरुक्तः । प्रजानां पालनाद् विष्णुः **प्रजापतिः** । स्वरूपप्रज्ञया सर्वं सञ्जानन् त्रिषु ज्योतिष्षु सन्निहितो भवति । एवं **षोडशीं** कलां जीवस्वरूपं च **सचते** ॥ १० ॥

अथ कस्मादुच्यते ज्वलन्तमिति? यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि स्वतेजसा ज्वलति ज्वालयति ज्वाल्यते ज्वालयते–

सविता प्रसविता दीप्तो दीपयन् दीप्यमानः ।
ज्वलन् ज्वलिता तपन् वितपन् ।
सन्तपन् रोचनो रोचमानः
शोभनः शोभमानः कल्याणः ॥

तस्मादुच्यते ज्वलन्तमिति ॥ ११ ॥

सर्वलोकादिष्वयं **ज्वलति** । स्वसन्निधानेन **सर्वाणि ज्वालयति** । ज्वलं सत् ततं **ज्वलन्तम्** । ऋषिभिः शास्त्रप्रणयनेन **ज्वाल्यते** । स्वयमेव तेषु

स्थित्वा **ज्वालयते** च। 'त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय' इति स्मरणात्। अत्रार्थे **सवितेत्यादि** याजुषो मन्त्र इत्याचक्षते। पञ्चपादो मन्त्रः। प्रथमकं पादद्वयं सप्ताक्षरं नवाक्षरम्। संहत्य षोडशाक्षरम्। ततस्त्रयः पादा दशाक्षराः। संहत्य षट्चत्वारिंशदक्षरा स्वराट् त्रिष्टुप् भुरिग्जगती वा। तदेवमुष्णिगनुष्टुब्बृहतीनां त्रिष्टुब्जगत्योश्च समाहारोऽयम्। सूर्य्यान्तर्य्यामी **सविता** ज्वलति। स एव सर्व**प्रसविता**। स्वयं **दीप्तः** सूर्य्यामितद्युतिः। सूर्य्यादीन् **दीपयन्**। स्वरूपतेजसा दीप्यमानः। शत्रूणां पुरो **ज्वलन्,** अग्न्यादिषु स्थित्वा **ज्वलिता,** सर्वजीवेषु **तपन्,** ब्रह्मादिषु विविधं तपन्, उत्तमेषु जीवेषु सन्तपन्, वायौ स्थित्वा रोचमानः **रोचनः**। सर्वत्र **रोचमानः**, सर्व**शोभनः शोभमानः कल्याणः**॥ ११॥

अथ कस्मादुच्यते सर्वतोमुखमिति। यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि स्वयमनिन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वतो गच्छति सर्वत आदत्ते सर्वगः सर्वतस्तिष्ठति–

एकः पुरस्ताद् य इदं बभूव
यतो बभूव भुवनस्य गोपाः।
यमप्येति भुवनं साम्पराये
नमामि तमहं सर्वतोमुखमिति॥

तस्मादुच्यते सर्वतोमुखमिति॥ १२॥

पश्यति शृणोतीति ज्ञानेन्द्रियोपलक्षणम्। **गच्छत्यादत्त** इति कर्म्मेन्द्रियोपलक्षणम्। सर्वमवगच्छतीति सर्वगः। मन्त्रसंवादमाह– **एक** इति। **इदम्** अस्य जगतः **पुरस्तात् य एकः** सर्वेन्द्रियाभिन्नो **बभूव**। **यतो भुवनस्य** गोप्ता चतुर्म्मुखो **बभूव**। **भुवनं साम्पराये** प्रळये **यमप्येति तं सर्वतोमुखं** नरसिंह**महं नमामी**ति। 'विश्वतश्चक्षुरुत विश्वतोमुखः–' इति श्रुत्यन्तरम्। **सर्वतोमुखमि**ति च सर्वेन्द्रियोपलक्षणम्॥ १२॥

अथ कस्मादुच्यते नृसिंहमिति। यस्मात् सर्वेषां भूतानां ना वीर्य्यतमः श्रेष्ठतमश्च सिंहो वीर्य्यतमः श्रेष्ठतमश्च। तस्मान्नृसिंह आसीत् परमेश्वरो जगद्धितं वा एतद्रूपं यदक्षरं भवति–

प्र तद् विष्णुः स्तवते वीर्य्याय
मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा॥

तस्मादुच्यते नृसिंहमिति॥ १३॥

यथा **सर्वेषां** शरीरिणां **ना** पुरुषः **वीर्य्यवत्तमः श्रेष्ठतमश्च**। यथा मृगाणां **सिंहः वीर्य्यवत्तमः श्रेष्ठतमश्च**। तथाऽयं सर्वेभ्यः जीवजातेभ्यः वीर्य्यवत्तमः श्रेष्ठतमश्चेति नृसिंह उच्यते। **तस्मात् परमेश्वरः** ना च सिंहश्चाऽ**सीत्**। हिरण्यकेन निगृहीतस्य जगतो हितं **वा एतद्रूपम्**। यत् परविद्यावेद्यं **अक्षरं** परं ब्रह्म **भवति**। तत्र मन्त्रमाह– **प्र तत्**। दीर्घतमस आर्षं विष्णुदेवत्यं त्रैष्टुभं सूक्तम् (१.१५.२)। तत्र द्वितीयो मन्त्रः।

अथर्ववेदेऽपि पठ्यते । तैत्तिरीयब्राह्मणेऽपि । **विष्णुः** स्तूयते ज्ञानिभिः । **वीर्य्याय** हिरण्यकहननादिवीर्य्यनिमित्तम् । यः हिरण्यकस्य सिंहइव भीतिकरः । **गिरिष्ठा** वेदवाचि स्थितो भगवान् भक्तानुग्रहाय **कुचरः** भूमिचरो बभूव । त्रिविक्रमावतारे **यस्योरुषु त्रिषु विक्रमणेषु अधिक्षियन्ति** अधिष्ठाय निवसन्ति **विश्वा भुवनानि** ॥ १३ ॥

अथ कस्मादुच्यते भीषणमिति? यस्माद् भीषणं यस्य रूपं दृष्ट्वा सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि भीत्या पलायन्ते स्वयं यतःकुतश्च न बिभेति–

भीषाऽस्माद् वातः पवते भीषोदेति सूर्य्यः ।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्द्धावति पञ्चम इति ॥

तस्मादुच्यते भीषणमिति ॥ १४ ॥

हिरण्यकवधार्त्थं धृतभीकररूपं **दृष्ट्वा भीत्या पलायन्ते** । उक्तं गीतायामपि– 'दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्' । सर्वाण्यपि भगवद्रूपाणि सतामभयदानि । भीषणान्यसताम् । तैत्तिरीयोपनिषदि पठितं मन्त्रमाह– **भीषाऽस्मात्** । भीषा भीत्या । मन्त्रान्तरं च– 'भयादस्याग्निस्तपति भयात् तपति सूर्य्यः । भयादस्येन्द्रश्च वायुश्च मृत्युर्द्धावति पञ्चमः' इति काठके । सर्वदेवानामुपलक्षणम् ॥ १४ ॥

अथ कस्मादुच्यते भद्रमिति? यस्मात् स्वयं भद्रो भूत्वा भद्रं ददाति । रोचनो रोजमानः शोभनः शोभमानः कल्याणः–

भद्रं कर्ण्णेभिः शृणुयाम देवाः
भद्रं पश्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः
व्यशेम देवहितंय्यदाहुः ॥
तस्मादुच्यते भद्रमिति ॥ १५ ॥

भद्रः परममङ्गलरूपः प्रह्लादादीनाम् । सर्वतो **भद्रं** दुरितादिनिवृत्तिरूपं मङ्गलं **ददाति** । मन्त्रश्च स्फुटं तं कल्याणरूपमाह । 'यत् ते रूपं कल्याणतमम्' इति चान्यत्र । साक्षात् मन्मथ इव सर्वरोचकः । **यतो** द्वात्रिंशल्लक्षणैः **रोचमानः । शोभनः** मनोहरः । **स्वभक्तहृदयेषु शोभमानः । कल्याणः** मङ्गलानां च मङ्गलम् । मन्त्रसंवादमाह– **भद्रं कर्ण्णेभिः** । गोतमस्य राहूगणस्याऽर्षं विश्वेदेवदेवत्यं त्रैष्टुभं सूक्तं दशमन्त्रम् (ऋ.सं.१.८९.८) । तत्रायमष्टमो मन्त्रः । शान्तिमन्त्रोऽयमाथर्वणानाम् । तैत्तिरीयारण्यके प्रथमो मन्त्रः । सामवेदेऽपि पठ्यते । पूर्वमेव व्याख्यातम् ॥ १५ ॥

अथ कस्मादुच्यते मृत्युमृत्युमिति? यस्मात् स्वमहिम्ना स्वभक्तानां स्मृत एव मृत्युमपमृत्युं च मारयति–

य आत्मदा बलदा यस्य विश्वे
उपासते प्रदिशं यस्य देवाः ।
यस्य च्छायाऽमृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम ॥
तस्मादुच्यते मृत्युमृत्युमिति ॥ १६ ॥

मृत्युं सहजम्, **अपमृत्युं** दुर्म्मरणम् । **मारयति** निवारयति । **मृत्युं** दुर्ग्गाम् । ततोऽपकृष्टं मृत्युं यमं च । 'मृत्युर्य्यस्योपसेचनम्' इति काठके । मन्त्रसंवादमाह– **य आत्मदाः** (ऋ.१०.१२१.२) । हिरण्यगर्भस्याऽर्षं त्रैष्टुभं सूक्तम् । क इति चतुर्म्मुखान्तरात्मा नरसिंहो देवता । यो भक्तानां मार्क्कण्डेयादीनां आत्मानं शरीरं ददाति दीर्घजीवनाय । हिरण्यकादी-नामात्मानं द्यति । मरणोन्मुखाय पुनर्ज्जीवितुं बलं ददाति । बलिष्ठस्यापि हिरण्यकादेर्बलं द्यति । 'स वै बलं बलिनां चापरेषाम्' इति भागवते । **विश्वे** सर्वे जीवाः **यस्य** यदधीनाः । **यस्य प्रदि**शमादेशं **देवा** अप्**युपासते** अनुतिष्ठन्ति । **अमृत**ममरणं अमृतत्वं वा **यस्य छायेव** वशवर्त्ति । एवं **मृत्यु**रपि **च्छाया** । तस्मा एकस्मै **देवाय हविषा**ऽर्च्चयाम इति ॥ १६ ॥

अथ कस्मादुच्यते नमामीति? यस्माद् सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च–

प्र नूनं ब्रह्मणस्पति-
र्म्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्य्यमा
देवा ओकांसि चक्रिरे ॥

तस्मादुच्यते नमामीति ॥ १७ ॥

मुमुक्षा दैत्यानामपि स्यात् । अतो ब्रह्मवादिन इत्याह । अमितानि नमनानि यस्यैव स नमामीत्युच्यते । अत्र मन्त्रमाह– **प्र नूनम्** (१.४०.५) कण्वस्याऽर्षम् । ब्राह्मणस्पत्यम् । पथ्याबृहती । ब्रह्मणश्चतुर्म्मखस्यापि पतिर्नारायणः, उत्थापकत्वादुक्थो नारायणः तद्विषय उक्थ्यो मन्त्रः ।

स एव भगवान् विष्णुः स्वविषयं **मन्त्रं** स्वयमेव वदति **ब्रह्मणे**। 'तेने ब्रह्म हृदा य आदिकवये' इति स्मरणात्। **यस्मिन्** मन्त्रे इन्द्राद्या देवा वाच्यत्वेन स्थिताः। अथच चत्वारो देवा वासुदेवाद्याः। इन्द्र इति प्रद्युम्नः। वरुण इति वासुदेवः। मित्र इत्यनिरुद्धः। अर्य्यमा सङ्कर्षणः। तस्मात् मन्त्रैर्य्योयो देवो नम्यते तत्र तदन्तर्य्यामी नारायण एव नम्यते। **तस्मादुच्यते नमामी**ति। तदुक्तम्– 'सर्वदेवनमस्कारः केशवं प्रति गच्छति' इति ॥ १७ ॥

अथ कस्मादुच्यतेऽहमिति?–

अहमस्मि प्रथमजा ऋतस्य।
पूर्वं देवेभ्यो अमृतस्य नाभिः।
यो मा ददाति स इदेव माऽवाः।
अहमन्नमन्नमदन्तमद्मि।
अहं विश्वं भुवनमभ्यभवाम्।
सुवर्ण्णज्योतीः।
य एवं वेद। इत्युपनिषत्॥ १८ ॥

॥ इति द्वितीयोपनिषत् ॥

भगवतः अहम्पदवाच्यत्वे तैत्तिरीयश्रुत्या कैमुत्यमाह– **अहमस्मि**। याजुष्यस्त्रिष्टुभ इमाः पञ्च, षष्ठी याजुष्यनुष्टुप्। अन्ते पञ्चाक्षरौ द्वौ निगदौ। 'यदेव पितुस्तत्पुत्रस्य' इति हि श्रुतिः। देवेभ्यः पूर्वं **ऋतस्य** विष्णोः प्रथमजातोऽहं चतुर्म्मुखोऽपि **अहं**शब्दवाच्योऽ**स्मि**। किमुत

नारायणः? जीवमानित्वेन ब्रह्माऽपि हातुं न शक्यः। किमुत सर्वान्तर्य्यामी नारायणः। ननु मुक्तौ ब्रह्मा हातुं शक्यः। नेत्याह– **अमृतस्य** मुक्तवर्ग्गस्यापि **नाभि**राश्रयः । **यो मां ददात्यु**पदिशति शिष्येभ्यः अहम्पदवाच्यम् **स** इत्थमेव अहम्पदवाच्यः सन्नेव, न तदभेदेन, **मा आवाः**, आयाति। **अहं** भगवतोऽन्नम् **अन्नमदन्तं** जीवलोक**मझि** । अहं विश्वं **भुवनमभ्य-भवाम्**। अथापि सुवर्ण्णौ भगवान् मम ज्योतिः जीवने दीप इव। अथच सुवर्ण्णो अ इति हमिति च यस्य द्योतकौ स भगवान् सुवर्ण्णज्योतिः भवति। ब्रह्मणः मुख्यमेतत्। **य एवं वेद** तस्यापि सुवर्ण्णज्योतिर्भवति भगवान्। **इति** इय**मुपनिषद्** रहस्यविद्या ॥ १८ ॥

—०—

तृतीयोपनिषत्

देवा ह्वै प्रजापतिमब्रुवन्। आनुष्टुभस्य मन्त्रराजस्य नारसिंहस्य शक्तिं बीजं नो ब्रूहि भगव इति ॥ १ ॥

नारसिंहस्याऽनुष्टुभस्य शक्तिस्थानमक्षरं बीजस्थानं चाक्षरं मन्त्रान्तर्गतं नो ब्रूहीत्यब्रुवन् ॥१ ॥

सहोवाच प्रजापतिः– माया वा एषा नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति। तस्मान्मायामेतां शक्तिं विद्यात्। य एतां मायां शक्तिं वेद स पाप्मानं तरति स मृत्युं तरति स संसारं तरति सोऽमृतत्वं च गच्छति महतीं श्रियमश्नुते ॥ २ ॥

प्रजापतिराह– **या वै मा एषा वै माया**। या नृसिंहमन्त्रे 'इम्' इत्युक्ता। साऽत्र मायाबीजत्वेन ईं बभूव। 'तां पद्मिनीमीं शरणं प्रपद्ये' इति श्रवणात्। **एषा नारसिंही** लक्ष्मीः **सर्वमिदं सृजति रक्षति संहरति** च। तथाह्याचार्य्यवचनम्– 'विश्वस्थितिप्रळयसर्ग्गमहाविभूतिवृत्तिप्रकाश-

नियमावृतिबन्धमोक्षाः । यस्या अपाङ्गलवमात्रत ऊर्ज्जिता सा श्रीर्य्यत्कटाक्षबलवत्यजितं नमामि' इति । अन्यत् स्फुटम् ॥ २ ॥

मीमांसन्ते ब्रह्मवादिनो ह्रस्वा दीर्घा प्लुता चेति । यदि ह्रस्वा भवति सर्वं पाप्मानं दहत्यमृतत्वं च गच्छति । यदि दीर्घा भवति महतीं श्रियमाप्नोत्यमृतत्वं च गच्छति । यदि प्लुता भवति ज्ञानवान् भवत्यमृतत्वं च गच्छति ॥ ३ ॥

यदि ह्रस्वा इमिति । इण् गतौ । गमयति पापमिति इम् । तदाह– **सर्वं पाप्मानं दहति** । ईष्टेऽनयेति ईम् । तदाह **महतीं श्रियमाप्नोति** । प्लुतमवधारयति । उत्तमां सम्पदं ज्ञानमाप्नोति । तदाह– **ज्ञानवान् भवती**ति । **अमृतत्वं** तु सर्वसाधारणम् ॥ ३ ॥

तदेतदृषिणोक्तं निदर्शनम्–

स ईं पाहि य ऋजीषी तरुत्रः
श्रियं लक्ष्मीमौपलामम्बिकां गाम् ।
षष्ठीं च यामिन्द्रसेनेत्युताहु-
स्तां विद्यां ब्रह्मयोनिं सरूपा-
मिहाऽयुषे शरणमहं प्रपद्ये ॥ ४ ॥

तदेतद् वक्ष्यमाणं **ऋषिणोक्तं** अस्य मन्त्रार्थस्य **निदर्शनं** भवति समाख्यात्वेन । पञ्चपदां त्रिष्टुभमाह । चतुर्थी निचृत् । अन्त्या भुरिक् । अयं मन्त्रार्थः– **यः** साधकः **ऋजीषी** ऋजुमार्ग्गस्येष्टे, साध्वाचरणः, तरुं

त्रुटतीति संसारवृक्षच्छेत्ता । **स** त्वं **ईं पाहि** गोपाय । तामीं विशिनष्टि– अङ्कं श्रिता श्रीः । श्रीवत्सरूपा वा । 'श्रियाऽद्ध्यासितवामाङ्कः श्रीवत्सेन विराजितः' इति नृसिंहाष्टोत्तरशतनामसु । लक्षणभूता लक्ष्मीः । 'लक्ष्मीप्रियपरिग्रहः' इति च । उपलप्रचुरत्वात् भूमिरुपला । तन्नियामिका भूर्देवी औपला । सैव रजसा जगत्सूत इति अम्बिका । वेदमानिनी या प्रळये भगवन्तं श्रुतिभिः स्तौति सा गौः । **गामि**ति दुर्गां च । एवं पञ्चरूपाण्युक्तानि । **षष्टीं** च मायामूर्त्तिं **पाहि** । यामिन्द्रसेनामाचक्षते । ययेन्द्रः सस्वामिकः । द्युलोकमानिरूपम् । विद्यादेवता । ब्रह्मज्ञानहेतुः । ब्रह्मणा समानरूपामनादिनिधनां नित्यमुक्तां सर्वगतां च । ब्रह्मोपास्तिहेतव **आयुषे शरणमहं प्रपद्ये** ॥ ४ ॥

सर्वेषां वा एतद्भूतानामाकाशः परायणम् । सर्वाणि ह्वा इमानि भूतान्याकाशादेव जायन्ते । आकाशादेव जातानि जीवन्त्याकाशं प्रयन्त्यभिसंविशन्ति । तस्मादाकाशं बीजं विद्यात् ॥ ५ ॥

आकाशते, आकाशयति, आ कमश्नातीति **आकाशो** भगवान् । 'को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात्' इति श्रुतिः । 'आकाशस्तल्लिङ्गात्' इति च बादरायणं सूत्रम् । तस्मादाकाशवाचकं नृसिंहनाम्नश्चरमाक्षरं बीजमन्त्रं विद्यात् हमिति ॥ ५ ॥

तदेतदृषिणोक्तं निदर्शनम्–

हं सः शुचिषद् वसुरन्तरिक्षसद्
होता वेदिषदतिथिर्दुरोणसत् ।

नृषद् वरसदृतसद् व्योपसद्
अब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

य एवं वेदेति महोपनिषत् ॥ ६ ॥

॥ इति तृतीयोपनिषत् ॥

मन्त्रोऽयमृग्वेदे पठ्यते । तत्रान्ते 'बृहत्' इति पदं नास्ति । बृहत्पदघटितः काठके पठ्यते (२.२.२.) । यः **हंसः स** किल **हम्** । हकारवाच्यः इत्यर्थः । सर्वदोषहानात् **हम्** । सर्वसारत्वात् **सः** । शुचौ वायौ सन् **शुचिषत्** । वरसुखत्वात् **वसुः** । अन्तरिक्षगः । इन्द्रियेषु विषय**होता** । यज्ञवेद्यां पूजितो **वेदिषत्** । प्रळये सर्वात्तृत्वादत्यन्न इत्य**तिथिः** । द्रोणकलशगते सोमे स्थित इति **दुरोणसत्** । नृषु स्थितः । वरेषु देवेष्वपि स्थितः । ऋतेषु वेदेषु वाच्यतया स्थितः । व्योतं जगदस्यामिति प्रकृति-र्व्योम । तत्रापि स्थितः । ये ऋता मुक्ता जातास्तेष्वपि आस्ते इति ऋतजाः । अब्जे हिरण्यगर्भे आस्त इत्य**ब्जाः** । गौः सरस्वती । ततो जाता गरुडशेषरुद्राः । तेष्वास्त इति **गोजाः** । आदरणीयत्वादद्री रुद्रः । तज्ज इन्द्रेऽप्यास्त इत्य**द्रिजाः** । **ऋतं** वेदमुख्यवाच्यम् । सर्वबृहत्वात् **बृहत्** नरसिंहाख्यम् । अधिकमस्मत्कृतायां काठकचन्द्रिकायां द्रष्टव्यम् ॥ ६ ॥

—०—

चतुर्थी उपनिषत्

देवा हवै प्रजापतिमब्रुवन्– आनुष्टभस्य मन्त्रराजस्य नारसिंहस्याङ्गमन्त्रान् नो ब्रूहि भगव इति ॥ १ ॥

स्फुटोऽर्थः ॥ १ ॥

सहोवाच प्रजापतिः प्रणवं सावित्रीं यजुर्ल्लक्ष्मीं नृसिंह-गायत्रीमित्यङ्गानि जानीयाद् यो जानीते सोऽमृतत्वं च गच्छति ॥ २ ॥

प्रणवमेकमङ्गमन्त्रमाह । **सावित्रीं** वक्ष्यमाणामष्टाक्षरां द्वितीयाम् । **यजुर्ल्लक्ष्मीं** च तृतीयाम् । **नृसिंहगायत्रीं** चतुर्थी**मुवाच प्रजापतिः** ॥ २ ॥

ओमित्येतदक्षरमिदं सर्वम् । तस्योपव्याख्यानं भूतं भवद् भविष्यदिति । सर्वमोङ्कार एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव । सर्वं ह्येतद् ब्रह्म । अयमात्मा ब्रह्म । सोऽयमात्मा चतुष्पात् ॥ ३ ॥

प्रथमाङ्गमन्त्रस्य प्रणवस्य महिमानमाह– **ओमि**ति । ओङ्कारार्थभूत-भगवन्महिमोक्त्या ओङ्कार एव स्तूयते । अस्य व्याख्यानं माण्डूक-भाष्यटीकायां कृतमस्माभिरिति तत्रैव द्रष्टव्यम् ॥ ३–७ ॥

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः ॥ ४ ॥

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥ ५ ॥

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवाऽनन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः । एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्य्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

नान्तःप्रज्ञं नबहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ७ ॥

अथ सावित्री गायत्री या यजुषः प्रोक्ता तया सर्वमिदं व्याप्तम् । घृणिरिति द्वे अक्षरे । सूर्य्य इति त्रीणि । आदित्य इति त्रीणि । एतद्वै सावित्रस्याष्टाक्षरं पदं श्रियाऽभिषिक्तम् । य एवं वेद श्रिया हैवाभिषिच्यते ॥ ८ ॥

अथ द्वितीयमङ्गमन्त्रमाह । सवितुर्ग्गायत्री । अष्टाक्षरः पाद इति याजुषी गायत्री । वस्तुतस्तु गायन्तं त्रयत इति स्त्रीरूपो नरसिंह एव । तदेतदाह– **तया** नरसिंहमूर्त्त्या **सर्वमिदं व्याप्तम्** । नन्वष्टाक्षरा गायत्री । तत् कथं सावित्री गायत्री? अतोऽष्टाक्षरतामाह– **घृणिरिति द्वे अक्षरे** । क्षैप्राक्षरव्यूहे सूरिय इति **सूर्य्यः** । अष्टमूर्त्तिर्नरसिंहः । एकैकमक्षरं अष्टानामक्षराणां मूर्त्तीनां वाचकमिति नरसिंहोऽप्यष्टाक्षरः । कानि तानि? विश्वादीनि वा शिवस्याष्टमूर्त्तिगतानि वा । **श्रिया** श्रीबीजेन श्रीमिति अभिषिक्तम् मन्त्रादावभिषिक्तम् । श्रीसहितो नृसिंहो देवता । जानन् **श्रियाऽभिषिच्यते** सम्राड् भवति ॥ ८ ॥

तदेदृचाऽभ्युक्तम्–

ऋचो अक्षरे परमे व्योमन्
यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति
य इत् तद् विदुस्त इमे समासत इति ॥ ९ ॥

ऋच इत्यस्यवामीयम् । (१.१६४.३९) दीर्घतमा औचथ्यः । विश्वदेवान्तर्ग्गतो नरसिंहः । त्रिष्टुप् । वस्तुतस्तु पूर्वार्द्धे त्रिष्टुप् । उत्तरार्द्धे जगती । स्वराट्त्रिष्टुब् वा । **परमे व्योमन्** हृदयाकाशे यदक्षरं परं ब्रह्म तदर्थाः सर्वा **ऋचः** । स्तुतिरूपा मन्त्राः । सर्वे वेदाः स्तुतिरूपा इत्यृच एव । यस्मिन् परब्रह्मणि सर्वे देवा अधिष्ठिताः । **यस्तदक्षरं** सर्वजीवान्तर्य्यामि सर्वकर्त्तृ सर्वपदवाच्यं **न वेद**– 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति । स **किमृचा करिष्यति**? तं **ये** इत्थं पिण्डाण्डगतं ब्रह्माण्डगतमेकमक्षरं **विदुस्त इमे** सम्यगासत इति ॥ ९ ॥

नहवा एतस्यर्च्चा न यजुषा न साम्नाऽर्त्थोऽस्ति यः सावित्रं वेदेति ॥ १० ॥

यः सावित्रं सूर्य्यमण्डलमद्ध्यगं नारायणं वेद किं तस्य वेदैः । अधिगतत्वाद् वेदवेद्यस्य ॥ १० ॥

ओंभूर्ल्लक्ष्मीर्भुवोलक्ष्मीः सुवः कालकण्ठी तन्नो महालक्ष्मीः प्रचोदयात् इत्येषा वै महालक्ष्मी-र्य्यजुर्ग्गायत्री चतुर्विंशत्यक्षरा भवति ॥ ११ ॥

तृतीयमङ्गमन्त्रमाह– **ओं भूः** । **भू** रजोमानिनी । भुवनान्यवतीति **भुवः** श्रीः सत्वमानिनी । भुवर्ल्लक्ष्मीरिति केचित् पठन्ति । अनार्षः पाठः । भुव इति हि सान्तं पदम् । न रेफान्तम् । सुवरिति तमोमानिनी प्रळये सुखमयेन भगवता सह वर्त्तमाना । त्रिलोकगता च लक्ष्मीः । कालः परकालः नरसिंहः कण्ठे उपकण्ठे यस्याः सा कालकण्ठी । 'कालकर्ण्णी' इति क्वचित् । कालदेवतां शिवमपि यममपि कर्ण्णयति नाशयतीति कालकर्ण्णी । कर्ण्ण भेदने । महालक्ष्मीर्न्नाम मन्त्रः । **चतुर्विंशत्यक्षरा** अथापि न पादबद्धेति **यजुर्ग्गायत्री** ॥ ११ ॥

गायत्री वा इदं सर्वं यदिदं किञ्च तस्माद् य एतां महालक्ष्मीं याजुषीं वेद महतीं श्रियमश्नुते ॥ १२ ॥

मुख्यतः **गायत्री** नरसिंह एव **यदिदं सर्वं** परिपूर्ण्णं ब्रह्म ॥ १२ ॥

ओं नृसिंहस्य विद्महे वज्रनखाय धीमहि । तन्नः सिंहः प्रचोदयात् इत्येषा वै नृसिंहगायत्री देवानां

वेदानां निदानं भवति । य एवं वेद निदानवान् भवति ॥ १३ ॥

चतुर्त्थमङ्गमन्त्रं नृसिंहगायत्रीमाह– ॐ **नृसिंहस्य** । तदनुग्रहाय तं जानीमः । तदनुग्रहाय तमेव वज्रनखं द्धचायामः । 'पुरुहूतवैरिविपाटने प्रत्येकवज्रायिताः श्रीमत्कण्ठीरवास्यप्रततसुनखरा' इत्याचार्य्यवचनम् । सुपथे प्रचोदयात् । सेयं **गायत्री देवानां** देवत्वप्राप्तौ **निदानम्** । **वेदानां निदानम्**– पादत्रयस्य वेदत्रयसारत्वात् । गायत्रीप्रतिपाद्यो भगवान् मुख्यतो **निदानम्** । **निदानवान्** मन्त्रसिद्धो **भवति** । भगवज्ज्ञानी भवति ॥ १३ ॥

देवा हवै प्रजापतिमब्रुवन्– अथ कैर्म्मन्त्रैः स्तुतो देवः प्रीतो भवति स्वात्मानं दर्शयति तन्नो ब्रूहि भगव इति ॥ १४ ॥

स्पष्टम् ॥ १३ ॥

स होवाच प्रजापतिः– ॐ यो हवै नृसिंहो देवो भगवान् यश्च ब्रह्मा भूर्भुवःस्वस्तस्मै वै नमोनमः(१) ॐ यो ह वै नृसिंहो देवो भगवान् यश्च विष्णुर्भूर्भुवःस्वस्तस्मै वै नमोनमः(२) ॐ यो हवै नृसिंहो देवो भगवान् यश्च महेश्वरो भूर्भुवःस्वस्तस्मै वै नमोनमः(३) । ॐ यो हवै नृसिंहो देवो भगवान् यश्च पुरुषो भूर्भुवःस्वस्तस्मै वै नमोनमः (४) । ॐ यो हवै नृसिंहो देवो भगवान् यश्चेश्वरो भूर्भुवःस्वस्तस्मै वै नमोनमः (५) । ॐ यो

हवै नृसिंहो देवो भगवान् या सरस्वती भूर्भुवःस्वस्तस्मै वै नमोनमः (६) ॐ यो हवै नृसिंहो देवो भगवान् या श्रीर्भूर्भुवःस्वस्तस्मै वै नमोनमः (७) । ॐ यो हवै नृसिंहो देवो भगवान् या गौरी भूर्भुवःस्वस्तस्मै वै नमोनमः (८) । ॐ यो हवै नृसिंहो देवो भगवान् या प्रकृतिर्भूर्भुवःस्वस्तस्मै वै नमोनमः (९) । ॐ यो हवै नृसिंहो देवो भगवान् या विद्या भूर्भुवःस्वस्तस्मै वै नमोनमः (१०) । ॐ यो हवै नृसिंहो देवो भगवान् यश्चोङ्कारो भूर्भुवःस्वस्तस्मै वै नमोनमः (११) । ॐ यो हवै नृसिंहो देवो भगवान् याश्चतस्रोऽर्द्धमात्रा भूर्भुवःस्वस्तस्मै वै नमोनमः (१२) । ॐ यो हवै नृसिंहो देवो भगवान् ये वेदाः साङ्गाः सशाखाः सेतिहासा भूर्भुवःस्वस्तस्मै वै नमोनमः (१३) । ॐ यो हवै नृसिंहो देवो भगवान् ये पञ्चाग्नयो भूर्भुवःस्वस्तस्मै वै नमोनमः (१४) । ॐ यो हवै नृसिंहो देवो भगवान् याः सप्त-महाव्याहृतयो भूर्भुवःस्वस्तस्मै वै नमोनमः (१५) । ॐ यो हवै नृसिंहो देवो भगवान् ये चाष्टौ लोकपाला भूर्भुवःस्वस्तस्मै वै नमोनमः (१६) । ॐ यो हवै नृसिंहो देवो भगवान् ये चाष्टौ वसवो भूर्भुवःस्वस्तस्मै वै

नमोनमः (१७)। ॐ यो हवै नृसिंहो देवो भगवान् ये चैकादश रुद्रा भूर्भुवःस्वस्तस्मै वै नमोनमः (१८)। ॐ यो हवै नृसिंहो देवो भगवान् ये च द्वादशाऽदित्या भूर्भुवःस्वस्तस्मै वै नमोनमः (१९) ॐ यो हवै नृसिंहो देवो भगवान् ये चाष्टौ ग्रहा भूर्भुवःस्वस्तस्मै वै नमोनमः (२०)। ॐ यो हवै नृसिंहो देवो भगवान् यानि च पञ्च महाभूतानि भूर्भुवःस्वस्तस्मै वै नमोनमः (२१)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च कालो भूर्भुवःस्वस्तस्मै वै नमोनमः (२२)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च मनुर्भूर्भुवःस्वस्तस्मै वै नमोनमः (२३)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च मृत्युर्भूर्भुवःस्वस्तस्मै वै नमोनमः (२४)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च यमो भूर्भुवःस्वस्तस्मै वै नमोनमः (२५)। ॐ यो हवै नृसिंहो देवो भगवान् यश्चान्तको भूर्भुवःस्वस्तस्मै वै नमोनमः (२६)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च प्राणो भूर्भुवःस्वस्तस्मै वै नमोनमः (२७)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च सूर्य्यो भूर्भुवःस्वस्तस्मै वै नमोनमः (२८)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च सोमो भूर्भुवःस्वस्तस्मै

वै नमोनमः (२९)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च विराट्पुरुषो भूर्भुवःस्वस्तस्मै वै नमोनमः (३०)। ॐ यो हवै नृसिंहो देवो भगवान् यश्च जीवो भूर्भुवःस्वस्तस्मै वै नमोनमः (३१)। ॐ यो हवै नृसिंहो देवो भगवान् यच्च सर्वं भूर्भुवःस्वस्तस्मै वै नमोनमः (३२)। इति द्वात्रिंशत्। इति तान् प्रजापतिरब्रवी-देतैम्मन्त्रैर्न्नित्यं देवं स्तुध्वम्॥ १५॥

द्ध्येयमन्त्रानाह। ओङ्कारवाच्यः भगवान् नरसिंहो देवः सृष्टौ ब्रह्मणिस्थो ब्रह्मनामा। प्रणवप्रतिपाद्यत्वादेव व्याहृतिप्रतिपाद्य**स्तस्मै नमोनमः**। व्याहृत्यर्थस्तु भगवत्पादैरुक्तः– 'पूर्णो भूतिवरोऽनन्तसुखो यद् व्याहृतीरितः' इति। 'भूर्नामा स्फूर्तिरूपत्वाद् भूरिवीर्य्यत्वतो भुवः। सुवः सुबलरूपत्वात्' इति च। **वायि**ति नृसिंहस्य सर्ववेदवेद्यत्वमाह। द्वितीयेन व्याहृत्युक्तगुणपूर्णत्वं च नृसिंहे प्रकटमित्याह (१)। स एव स्वयं विष्णुनामा पाता बभूव (२)। यो नृसिंहः स एव हि मुख्यतो **महेश्वरः** शिवगतः संहर्त्ता। तदधिष्ठानत्वात् शिवोऽपि महेश्वरः। 'ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः' इति हि स्मरन्ति। (३)। एवं भगवतस्त्रीणि रूपाणि नरसिंहाभेदेन द्ध्यातानि। **यश्च पुरुष**श्चतुर्म्मुखः जीवकलामानी पुरुषनामकः। मुख्यतः पुरुषनामा तु सर्वजीवान्त-र्य्यामकः पुरुषसूक्तप्रतिपाद्यः नरसिंह एव। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति' इति भगवद्वचनम्। 'ईश्वरः ईशनशीलो नारायणः' इति परभाष्यम् (५)। **सरस्वती**ति भूरूपा श्रीः। चतुर्म्मुखदयिता च। वस्तुतस्तु तदुभ-यान्तर्गतो नरसिंह एव सरस्वती। सर्वत्र सरणात् हरेर्गुणाः सरांसि।

तान्येव तस्य स्वरूपभूतानीति। 'गुणत्वेन ततत्वात्तु भगवांश्च सरस्वती' इति भाष्यवचनम् (६)। **श्रीरि**ति सत्वमानिनी भगवद्रमणी। वायुदयिता भारती च। 'शंरूपाने नित्यरतेरियं श्रीः' इति भगवत्पादवचनात्। तदुभयसन्निहितः स्त्रीरूपो भगवानेव मुख्यतः। यत्सन्निधानेन **श्रीः** श्रीर्बभूव। श्रयन्त्येनां सर्वे श्रीब्रह्मरुद्राद्या इति (७)। **गौरी**ति तमोमानिनी विष्णुदयिता दुर्गा। शिवदयिता दुर्गाख्या पार्वती च। मुख्यतस्तद्गतः स्त्रीरूपो नरसिंहः **गौरी**। तमसा संहर्तृत्वेऽपि स्वयं गौरी नित्यशुद्धः। (८)। श्रीसरस्वतीभारत्यः प्रकृतिदेवताः। जडप्रकृतिश्च। मुख्यतो नरसिंह एव **प्रकृतिः**। 'प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते' इति हि स्मर्यते। तस्मात् स एव **वै प्रकृतिः**। (९)। विद्येति च तन्मानिन्यः श्रीसरस्वतीभारत्यः। या विद्या साऽपि मुख्यतो नरसिंह एव ज्ञानरूपत्वात् (१०)। ओङ्कारोऽपि नरसिंह एव। 'ओमित्याक्रियते यस्मादोङ्कारोऽसावतः परः' इति (११)। अकारोकारमकारनादा**श्चतस्रोऽर्द्धमात्राः**। तद्वाच्योऽपि नरसिंह एव। विश्वतैजसप्राज्ञतुरीयात्मा। कृष्णरामनृसिंहवराहा वा (१२)। न केवलं प्रणवः। प्रणवव्याख्यानभूता सर्वे वेदाश्च तस्यैव नामानि। तदङ्गानि शीक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं छन्द इति। ऋचां चतुर्विंशतिः शाखाः। यजुषामेकोनशतम्। साम्नां सहस्रम्। आथर्वणानां द्वादशेति। इतिहासः भारतं मूलरामायणं पञ्चरात्रं च। पुराणानामप्युपलक्षणम् (१३)। गार्हपत्यादयस्त्रयः प्रणीताग्निराग्नीध्रश्चेति **पञ्चाग्नयः**। तेषु नियामकत्वेन स्थिताः नरसिंहाग्नय एव मुख्यत उच्यन्ते (१४)। याश्च **सप्त महाव्याहृतयः** ताभिरपि सप्तलोकगतो भगवानेवोच्यते (१५)। एवं लोकपालगतो भगवानिन्द्रादिनामा (१६)। **ये चाष्टौ वसवः** द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वस्तुर्विभावसुरिति तन्नामापि नरसिंह एव (१७)। एकादशरुद्रनामाऽपि स एव।

रैवत ओजो भवो भीमो वाम उग्रो वृषाकपिः अजैकपात् अहिर्बुध्निः विरूपाक्षो महादेव **इत्येकादश रुद्राः** । 'यो देवानां नामधा एक एव' इत्यादेः (१८) । विवस्वानर्य्यमा पूषा त्वष्टाऽथ सविता भगः धाता विधाता वरुणो मित्रः शक्र उरुक्रम इति **द्वादशाऽदित्याः** । उरुक्रम इति वामनः (१९) । आदित्यादयः सप्त राहुश्चेति **अष्टौ ग्रहाः** । अथवा बृहदारण्यकोक्तदिशा– घ्राणः, वाक्, जिह्वा, चक्षुः, श्रोत्रम्, मनः, हस्तः त्वक् चेत्**यष्टौ ग्रहाः** । गन्धं गृह्णातीति घ्राणो ग्रहः । नाम गृह्णातीति वाग् ग्रहः । रसं गृह्णातीति जिह्वा ग्रहः । रूपं गृह्णातीति चक्षुर्ग्रहः । शब्दं गृह्णातीति श्रोत्रं ग्रहः । कामनां गृह्णातीति मनो ग्रहः । दत्तं गृह्णातीति हस्तो ग्रहः । स्पर्शं गृह्णातीति त्वग् ग्रहः (२०) । पञ्चात्मकत्वात् पञ्च । महच्च तद्भूतम् । 'एको विष्णुर्म्महद् भूतम्' इति भारते । 'अस्य महतो भूतस्य' इति श्रुतिः । बहुरूपत्वाद् बहुवचनम् । भूतनामानि च तस्यैव नामानि पृथिव्याप इत्यादीनि (२१) । **यश्च कालः** सृष्टिकालः स्थितिकाल इत्यादि । दुर्ग्गा ब्रह्मवायू रुद्रो यमः कालनामा गरुडः तत्पुत्राश्च चत्वारः कालनामानो विष्णुदूताः अथापि मुख्यतो नरसिंह एव कालः । अत एव तं परकालमाहुः । 'कालः परः स हि' इत्याचार्य्यवचनम् । 'कालोऽस्मि लोकक्षयकृत् प्रसिद्धः' इति भगवद्वचनम् । 'कालः कलितसम्पूर्ण्ण-सद्गुणत्वाज्जनार्दनः' इति हि स्मरन्ति (२२) मनवश्चतुर्दश । विशेषतः स्वायम्भुवो वैवस्वतश्च । यश्च मनुशब्दवाच्यः सोऽपि मुख्यतः नरसिंह एव (२३) । **मृत्युर्म्मरणम्** । यमदूतश्च मृत्युनामा । दुर्ग्गाद्याश्च मृतिहेतवः (२४) । न केवलं मृत्युः । **यमश्च** यमयतीति (२५) । **अन्तकश्च** (२६) । एवं **प्राणः** घ्राणदेवता । या जीवयति (२७) । सूर्य्यचन्द्रौ चक्षुःश्रोत्रदेवते (२८–२९) । **विराट्पुरुषः** ब्रह्माण्डम् (३०) **जीवश्चेतन-**जातम् (३१) । **सर्वं** चेतनाचेतनजातम् (३२) । इति द्वात्रिंशन्मन्त्राः

द्वात्रिंशदक्षरमन्त्रप्रतिपाद्यस्य नरसिंहस्यैव सर्वनियामकत्वं सर्वशब्दवाच्यत्वं चाऽहुः । **स्तुध्वं** स्तुथ ॥ १५ ॥

ततो देवः प्रीतो भवति । स्वात्मानं दर्शयति । तस्माद् य एतैर्म्मन्त्रैर्न्नित्यं देवं स्तौति स देवं पश्यति । सोऽमृतत्वं च गच्छति य एवं वेदेति महोपनिषत् ॥ १६ ॥

स्फुटोऽर्थः ॥ १६ ॥

इति चतुर्त्थुपनिषत्

—०—

पञ्चमी उपनिषत्

देवा हवै प्रजापतिमब्रुवन्– आनुष्टुभस्य मन्त्रराजस्य नारसिंहस्य महाचक्रं नाम चक्रं नो ब्रूहि भगव इति सार्वकामिकं मोक्षद्वारं यद्योगिन उपदिशन्ति ॥ १ ॥

अथ यन्त्रोपास्तिमाह । नरसिंहदेवत्यस्य **मन्त्रराजस्य** । **आनुष्टुभस्य** । बह्व्योऽनुष्टुभो भवन्ति । तथाऽपीयमेवानुष्टुप् मुख्यतोऽनुष्टुप् । स यथा बह्व्यो गायत्र्यो भवन्ति । तथाऽपि विश्वामित्रदृष्टैव गायत्री गायत्री भवति । चक्रं वृत्ताकाररेखाविशिष्टं यन्त्रम् । दुर्गारूपत्वात् महाचक्रं नाम । 'यस्य करालोळं चक्रं कालः–' इत्याचार्य्यवचनम् । 'पूर्वं हरेश्चक्रमभूद्धि दुर्गा' इति । अथ कामदेवप्रतीकम् । अत एव च प्रवृत्तानां **सार्वकामिकम्** । सर्वकामप्रदम् । स एव भरतः । स एव च प्रद्युम्नः । निवृत्तानां **मोक्षद्वारं** नरसिंहप्रसादद्वारा मोक्षसाधनम् ॥ १ ॥

स होवाच प्रजापतिः । षडरं वा एतत् सुदर्शनं महाचक्रम् । तस्मात् षडरं भवति । षट्पत्रं चक्रं भवति । षड् वा ऋतवः । ऋतुभिः सम्मितं भवति । मद्ध्ये नाभिर्भवति । नाभ्यां वा एते अराः प्रतिष्ठिताः । मायया वा एतत् सर्वं वेष्टितं भवति । नाऽत्मानं माया स्पृशति । तस्मान्मायया बहिर्वेष्टितं भवति ॥ २ ॥

सुदर्शनाख्यं विष्णोर्**म्महाचक्रं भवति** । **तस्मा**दिदमपि नारसिंहं चक्रं **षडरं भवति** । मद्ध्यचलोपेन षडरं षडक्षरम् । स-ह-स्रा-र-हुं-फट् इति । अरेष्वक्षराणि भवन्ति । भगवद्रूपाणि च भवन्ति । ऋच्छन्ति शीघ्रं गच्छन्ति भक्तरक्षार्त्थमसुरक्षपणार्त्थं चेत्यराणि षट् । पत्राकारा अरा भवन्तीति **षट्पत्रं चक्रं भवति** । कुतः? **षड् वा ऋतवः** । ऋच्छन्तीत्यराः । ऋच्छन्तीत्येवर्त्तवः षट् नारायणाद्याः पञ्च वेदव्यासश्च षष्ठः । तस्माच्चक्रं सङ्ख्यया **ऋतुभिः** समानं **भवति** । एवं परितः षडिमानि भगवद्रूपाणि भवन्ति । **मद्ध्ये नाभिर्न्नरसिंहो भवति** । नरसिंहं परितः नारायणाद्याः षडराः **प्रतिष्ठिता** अभिमुखतया स्थिता भवन्ति । तदिदं सर्वं बहिर्म्मायावृत्तेन **वेष्टितं भवति** । माया मोहिनी शक्तिः । परमात्मानं **न माया** जातु **स्पृशति** । अथापि **बहि**र्य्यवनिकयेवाऽच्छन्नः ॥ २ ॥

अथाष्टाक्षरमष्टपत्रं चक्रं भवति । अष्टाक्षरा वै गायत्री । गायत्र्या सम्मितं भवति । बहिर्म्मायया वेष्टितं भवति । क्षेत्रंक्षेत्रं वै मायैषा सम्पद्यते ॥ ३ ॥

अथ षडरचक्राद् बहिरष्टार**मष्टाक्षरं चाष्टपत्रं चक्रं भवति** । **अष्टाक्षरा वै गायत्री** तत्रारेषु भवति – ॐ नमो नारायणायेति । अष्टाक्षरपादा वा आर्च्ची गायत्री । नारायणाष्टक्षरा **वै** दैवी **गायत्री** । गायत्रीसङ्ख्यया सम्मिता अराः । पूर्ववत् इदमपि चक्रं **मायया वेष्टितं भवति** । कियन्ति वेष्टनानि? **क्षेत्रंक्षेत्रं वै** । क्षेत्रमिति अरस्थानमुच्यते । यावन्ति चक्राणि भवन्ति तावन्ति मायावेष्टनानि भवन्ति । पञ्च चक्रारा भवन्ति । पञ्च माया-वेष्टनानि ॥ ३ ॥

अथ द्वादशारं द्वादशपत्रं चक्रं भवति । द्वादशाक्षरा वै जगती । जगत्या सम्मितं भवति । बहिर्म्मायया वेष्टितं भवति ॥ ४ ॥

द्वादशाक्षरपदा वा आर्ची जगती । द्वादशार्ण्णो वै वासुदेवद्वादशाक्षरो मन्त्रः । मन्त्राक्षराण्यरेषु भवन्ति । तेन **जगत्या सम्मितं भवति चक्रम्** । तदपि **बहिर्म्मायया वेष्टितं भवती**ति तृतीयं वेष्टनम् ॥ ४ ॥

अथ षोडशारं षोडशपत्रं चक्रं भवति । षोडशकलो वै पुरुषः । पुरुष एवेदं सर्वम् । पुरुषेण सम्मितं भवति । मायया बहिर्वेष्टितं भवति ॥ ५ ॥

षोडशारं चक्रं षोडशाक्षरम् । कानि तान्यक्षराणि? षोडशस्वराः सबिन्दव इति वक्ष्यते । कानि भगवद्रूपाणि? षोडशकलानियामको भगवान् । काः षोडश कलाः? प्राणः श्रद्धा खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नं वीर्य्यं तपो मन्त्राः कर्म्म लोका नामानि च । अधिकं षट्प्रश्नभाष्याद-वगन्तव्यम् । षोडशी कला जीवस्वरूपम् । पञ्चदश तस्य संसारहेतव आवरणानि । पञ्चदशी मोचिका च । सात्विकानां मोचिका । राज-सानां संसारप्रदा । तामसानां तमःप्रदा । तत्र सन्निहितो भगवान् षोडश-स्वरैर्वेद्यः । स एव षोडशात्मा बह्वृचानामाथर्वणानां च पुरुषसूक्तप्रति-पाद्यः । पुरुषसूक्तसंवादमाह– **पुरुष एवेदं सर्वम्** । इमानि षोडशरूपा-ण्यपि पुरुष एव । न तेषु कश्चिद् भेदः । चक्राराः स्वराः पुरुषसूक्तमन्त्र-श्चेतीदं सर्वं षोडशसङ्ख्यया सम्मितं भवति । पूर्ववद् **बहिर्म्मायया च वेष्टितं भवति** ॥ ५ ॥

अथ द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रं भवति। द्वात्रिंशदक्षरा वा अनुष्टुब् भवति । अनुष्टुभा सर्वमिदं भवति । बहिर्म्मायया वेष्टितं भवति ॥ ६ ॥

अनुष्टुबिति प्रस्तुता नरसिंहानुष्टुप् । सर्वमिदं द्वात्रिंशत्सङ्ख्यत्वेन सम्मितं भवति । अनुष्टुभा सर्वमिदं छन्दो भवति । तिस्रोऽनुष्टुभश्चतस्रो गायत्र्यो भवन्ति । सप्तानुष्टुभः अष्टावुष्णिहो भवन्ति । नवानुष्टुभोऽष्टौ बृहत्यो भवन्ति । दशानुष्टुभोऽष्टौ पङ्क्तयो भवन्ति । एकादशानुष्टुभोऽष्टौ त्रिष्टुभो भवन्ति। तिस्रोऽनुष्टुभो द्वे जगत्यौ भवन्ति। एवमनुष्टुभा सर्वमिदं छन्दोजातं भवति । अनुगुणं भगवन्तं स्तौतीति सर्वं मन्त्रजातमनुष्टुबेव भवति । अतोऽनुष्टुभा **सर्वं** मन्त्रजातं ततं **भवति** । **मायया** च **वेष्टितं भवति** । अविद्यायाः पञ्चपर्वाणि । अतः पञ्चधा मायावेष्टनं भवति ॥ ६ ॥

अरैर्वा एतत् सुबद्धं भवति। वेदा वा एतेऽराः। पत्रैर्वा एतत् सर्वतः परिक्रामति। छन्दांसि वै पत्राणि ॥ ७ ॥

अरैरेतच्चक्रं सुदृढं निरवकाशतया सङ्घटितं भवति । अरेषु यान्यक्षराणि तानि वेदाक्षराणि वै । **पत्रैः** पतत्रैरिव **एतच्चक्रं परिक्रामति** । छन्दोमयाक्षरबद्धानि वै तानि पत्राणि ॥ ७ ॥

एतत् सुदर्शनं महाचक्रं तस्य मद्ध्ये नाभ्यां तारकमक्षरम् । नारसिंहमेकाक्षरं तद् भवति । षट्सु पत्रेषु षडक्षरं सुदर्शनं भवति । अष्टसु पत्रेष्वष्टाक्षरं नारायणं भवति । द्वादशसु पत्रेषु द्वादशाक्षरं वासुदेवं भवति ।

षोडशसु पत्रेषु मातृकाद्याः सबिन्दुकाः षोडश स्वरा भवन्ति । द्वात्रिंशत्सु पत्रेषु द्वात्रिंशदक्षरं मन्त्रराजं नारसिंहमानुष्टुभं भवति । तद्वा एतत् सुदर्शनं नाम चक्रं महाचक्रं सार्वकामिकं मोक्षद्वारमृङ्मयं यजुर्म्मयं साममयं ब्रह्ममयममृतमयं भवति। तस्य पुरस्ताद् वसव आसते । रुद्रा दक्षिणत आदित्याः पश्चात् विश्वेदेवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यां सूर्य्याचन्द्रमसौ पार्श्वयोः ॥ ८ ॥

संसार**तारकमक्षरम्**। किं तत्? **नारसिंहमेकाक्षरं तत्** ॐ क्षमिति। 'नृसिंहः क्षस्य देवता' इति वचनात्। **सुदर्शनं** सुदर्शनमन्त्रात्मकं सहस्रार हुँ फडिति। नारायणस्येदं मन्त्रात्मकं ओं नमो नारायणायेति। वासुदेव-देवत्यं **द्वादशाक्षरम्** ओं नमो भगवते वासुदेवायेति। मातृकाया आद्याः **षोडश स्वराः सबिन्दुकाः** अं आमित्यादि। **मन्त्रराजमि**ति मन्त्रराज इत्यर्थः। बिन्दुरवधारणे। वेदत्रयसारमयम्। भगवदेकतानम्। मोक्ष-प्रधानफलकम्। देवप्रचुरं वा। तदाह पुरस्तादष्टौ वसव आसते। दक्षिणत एकादश रुद्राः। पश्चिमे दशादित्याः। विष्णोर्विवस्वतश्च नाभ्यामुक्तत्वात्। उत्तरस्यां दश विश्वेदेवाः। नाभिपार्श्वयोः सूर्य्या-चन्द्रमसौ ॥८॥

तदेतदृचाऽभ्युक्तम्–

ऋचो अक्षरे परमे व्योमन्
यस्मिन् देवा अधि विश्वे निषेदुः।

यस्तन्न वेद किमृचा करिष्यति
य इत् तद्विदुस्त इमे समासत इति ॥ ९ ॥

दैर्घतमसोऽयं मन्त्रः । पूर्वमुद्धृतः सर्वमन्त्राणां भगवत्पर्य्यन्तत्वसमर्त्थनाय । अत्र चार्थान्तरे पुनरुद्धृतम्, मन्त्राणामनेकार्त्थत्वद्योतनाय । अर्च्यन्त इत्यृचः नरसिंहस्य बहूनि रूपाणि, अनुष्टबादयो वा मन्त्ररूपा **ऋचः** । व्योतं समस्तदेवजातमत्रेति **व्योम** सुदर्शनचक्रम् । मन्त्राक्षरमयं च तत् । तदेव स्फुटमाह– **यस्मिन् विश्वे देवा निषेदुः । यस्तत्** नृसिंहचक्रमानुष्टुभं वा **न वेद स** ऋङ्मन्त्रैः **किं करिष्यति** । **ये विदुस्त** एव सम्यगासते ॥ ९ ॥

तदेतत् सुदर्शनचक्रं बालो वा युवा वा वेद स महान् भवति । स गुरुः सर्वेषामुपदेष्टा भवति । अनुष्टुभा होमं कुर्य्यात् । अनुष्टुभाऽर्च्चनं कुर्य्यात् । तद् रक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कण्ठे बाहौ शिखायां बध्नीत । सप्तद्वीपवती भूमिर्दक्षिणार्त्थं नावकल्पते । तस्माच्छ्रद्धया याङ्कांश्चित् गां दद्यात् सा दक्षिणा भवति ॥ १० ॥

बाल्य एव चेद् वेद नूनं स महात्मा **भवति** । **युवा** चेदपि । **बालो**ऽपि **युवा**ऽपि **सर्वेषां** वृद्धानामपि **गुरुर्भवति** । अर्च्चनेन होमेन च **रक्षोघ्नं मृत्युतारकं** च भवति । **गुरुणा** मन्त्रितं **लब्धम्** । **सप्तद्वीपवती भूमिर्गुरो**र्**दक्षिणार्त्थं नावकल्पते** । दुष्टशिक्षायै पृथिवी हि गोरूपा बभूव । **वेदरूपां गाम्** ॥ १० ॥

देवा ह वै प्रजापतिमब्रुवन्। आनुष्टुभस्य मन्त्रराजस्य फलं नो ब्रूहि भगव इति ॥ ११ ॥

स्पष्टोऽर्थः ॥ ११ ॥

स होवाच प्रजापतिः– य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निपूतो भवति। स वायुपूतो भवति स आदित्यपूतो भवति। स सोमपूतो भवति। स सत्यपूतो भवति। स ब्रह्मपूतो भवति। स विष्णुपूतो भवति। स रुद्रपूतो भवति। स देवपूतो भवति। स सर्वपूतो भवति स सर्वपूतो भवति ॥ १२ ॥

॥ प्रथमोऽद्ध्यायः ॥

अधीतेऽर्थज्ञानपूर्वकमनुतिष्ठति। जपति द्ध्यायति च। अग्निवाय्वादित्या एनं पावयन्ति। नैनमग्निर्दहति। नैनं वायुः शोषयति। नैनमादित्यस्तपति। **सोमपूतः** शशिपूतः शशिशेखरपूतश्च। सोम आरोग्यदो भवति। रुद्रो भिषज्यति। सत्यो मुख्यवायुः। ब्रह्मविष्णुरुद्रा इति भगवतस्त्रीणि रूपाणि। सर्व**देवपूतो भवति**। अतः **सर्वपूतः** सुरक्षितो **भवति**। खण्डसमाप्तिद्योतिका द्विरुक्तिः। क्वचिदद्ध्यायभेदो न पठ्यते ॥ १२ ॥

—०—

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मृत्युं जयति स पाप्मानं तरति स ब्रह्महत्यां तरति । स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति । स संसारं तरति स सर्वं तरति स सर्वं तरति ॥ १३ ॥

॥ द्वितीयोऽङ्क्यायः ॥

मृत्युं जयति मुक्तो भवति । शिवपदयोग्यश्चेत् मृत्युञ्जयो भवति । ब्रह्मणो निर्गुणत्वानुसन्धानं ब्रह्महत्या । वेदनिन्दा च । अकस्मादबुद्धि-पूर्वं जाता ब्राह्मणहत्या च । भ्रूणः शिशुः स्त्रीगर्भो वा । परिवारदेवानां निराकरणं च । वीरहत्या ज्ञानिनिराकरणं च ॥ १४ ॥

—०—

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निं स्तम्भयति । स वायुं स्तम्भयति । स आदित्यं स्तम्भयति स सोमं स्तम्भयति स उदकं स्तम्भयति स सर्वान् देवान् स्तम्भयति स सर्वान् ग्रहान् स्तम्भयति स विषं स्तम्भयति स विषं स्तम्भयति ॥ १४ ॥

॥ तृतीयोऽङ्क्यायः ॥

पूर्वोक्तमेव रीत्यन्तरेणाह । पूर्वं तत्तद्देवान् प्रसाद्य तज्जय उक्तः । अत्र तु नरसिंहोपास्तिबलात् तेषां जयः ॥ १४ ॥

—०—

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स देवानाकर्षयति । स यज्ञानाकर्षयति । स नागानाकर्षयति । स ग्रहानाकर्षयति । स मनुष्यानाकर्षयति । स सर्वानाकर्षयति स सर्वानाकर्षयति ॥ १५ ॥

॥ चतुर्थोऽङ्क्यायः ॥

नरसिंहः स्वभक्तानामेवमाकर्षणशक्तिं वितरति ॥ १५ ॥

—०—

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स भूर्लोकं जयति स भुवोलोकं जयति स स्वर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति । स सर्वलोकं जयति स सर्वलोकं जयति ॥ १६ ॥

॥ पञ्चमोऽङ्क्यायः ॥

अन्ते सर्वं परिपूर्णं मोक्षाख्यं लोकं जयति ॥ १६ ॥

—०—

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निष्टोमेन यजते । स उक्थ्येन यजते । स षोडशिना यजते । स वाजपेयेन यजते । सोऽतिरात्रेण यजते । स

आप्नोर्य्यामेण यजते । सोऽश्वमेधेन यजते । स सर्वैः क्रतुभिर्य्यजते स सर्वैः क्रतुभिर्य्यजते ॥ १७ ॥

॥ षष्ठोऽङ्क्यायः ॥

नारसिंहमन्त्रोपास्त्या सर्वयज्ञफलं लभते ॥ १७ ॥

—०—

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स ऋचोऽधीते । स यजूंष्यधीते । स सामान्यधीते । सोऽथर्वाणमधीते । सोऽङ्गिरसमधीते । स शाखा अधीते । स पुराणान्यधीते । स कल्पानधीते । स गाथा अधीते । स नाराशंसीरधीते । स प्रणवमधीते । यः प्रणवमधीते स सर्वमधीते स सर्वमधीते ॥ १८ ॥

॥ सप्तमोऽङ्क्यायः ॥

अथर्वाङ्गिरसावथर्ववेदद्रष्टारौ । सर्ववेदानां भगवत्परोऽर्थस्तेषां स्फुरतीत्यर्थः । यथार्थस्फुरणमेव ह्यध्ययनस्य फलम् । **पुराणानि** प्रसिद्धान्यष्टादश । इतिहासस्याप्युपलक्षणम् । वेदप्रसङ्गात् अर्थवादप्रभेदः परकृतिरपि पुराणम् । पुराकल्पः **कल्पः** । कल्पसूत्राणि च । **गाथा** यजूंषि । 'अन्धो मणिमविन्दत' इत्यादीनि च । षष्ठ्यषळहस्य षष्ठेऽह्नि छन्दसां सवीर्य्यत्वाय पठनीयं कुन्तापसूक्तम् । तत्राऽद्यास्तिस्रो नाराशंस्यः । ततस्तिस्रो रैभ्यः । ततश्चतस्रः पारिक्षित्यः । ततश्चतस्रः कारव्यः । नाराशंसीरित्युपलणम् । नाराशंसीप्रभृतयश्चतुर्दश ऋचः

अतिदुर्घटार्था अप्यस्य सुघटार्था भवन्ति । अपिच नारं तत्वज्ञानं तदाशंसन्तीति नाराशंस्य उपनिषदः । अन्ततः सर्ववेदबीजाक्षरं प्रणवस्तस्य पुरः सर्वं वेदरहस्यं विवृणोति । तेन स सर्वज्ञो भवति । नास्याविदितं किञ्चिद् वेदरहस्यम् ॥ १८ ॥

—०—

अनुपनीतशतमेकम् । एकेनोपनीतेन तत् समम् । उपनीतशतमेकम् । एकेन गृहस्थेन तत् समम् । गृहस्थशतमेकम् । एकेन वानप्रस्थेन तत् समम् । वानप्रस्थशतमेकम् । एकेन यतिना तत् समम् । यतीनां तु शतं पूर्णमेकम् । एकेन रुद्रजापकेन तत् समम् । रुद्रजापकशतमेकम् । एकेनाथर्वशिरःशाखाद्ध्यापकेन तत् समम् । अथर्वशिरःशाखाद्ध्यापकशतमेकम् । एकेन तापनीयोपनिषदद्ध्यापकेन तत्समम् । तापनीयोपनिषदद्ध्यापकशतमेकम् । एकेन मन्त्रराजाद्ध्यापकेन तत् समम् ॥ १९ ॥

वेदाद्ध्ययनारम्भेण उपरि नीतः । अधीतवेदः वेदोक्तकर्म्मानुष्ठाता गृहस्थः । प्रवृत्तिमपहाय निवृत्तिमुखो वानप्रस्थः । सर्वात्मना निवृत्तो यतिः । रुद्रजापकः यः शतरुद्रियस्य त्र्यर्थतां जानन्नुपासकः । रुजां द्रवणात् रुद्रनामानः प्राणनारायणौ शिवश्च । तमेतं जानन्नुपासको जापकः अथर्वशिरांसि आथर्वण्य उपनिषदः । मन्त्रराजः नरसिंहानुष्टुप् ॥ १९ ॥

तद् वा एतत् परमं धाम मन्त्रराजाद्ध्यापकस्य यत्र न सूर्य्यस्तपति यत्र न वायुर्वाति यत्र न चन्द्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दुःखं सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवं ब्रह्मादिवन्दितं योगिद्ध्येयं परमं पदं यत्र गत्वा न निवर्त्तन्ते योगिनः ॥ २० ॥

'न तद् भासयते सूर्य्यो न शशाङ्को न पावकः । यद् गत्वा न निवर्त्तन्ते तद्धाम परमं मम' इति भगवद्गीतासु । 'न तत्र सूर्य्यो भाति न चन्द्रतारके नेमा विद्युतो भान्ति कुतोऽयमग्निः' इति काठकोपनिषदि । तदिदं **परमं पदं ब्रह्मादिवन्दितमि**ति मोक्षेऽपि भेदं द्रढयति ॥ २० ॥

तदेतदृचाऽभ्युक्तम्–

तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥

तद् विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्य्यत् परमं पदम् ॥

तदेतन्निष्कामस्य तदेतन्निष्कामस्य भवति य एवं वेदेति महोपनिषत् ॥ २१ ॥

॥ अष्टमोऽद्ध्यायः ॥

॥ इति तापनीयोपनिषत् समाप्ता ॥

'तद् विष्णोः–' इति (ऋ.१.२२.२०-२१) द्वे विष्णुदेवत्ये ऋचौ । गायत्रे मेधातिथिदृष्टे । व्याख्यातमेतद्भाष्ये–

'रमाब्रह्मशिवादिभ्यो यद्विष्णोः परमं पदम् ।
'रूपं पश्यन्ति निर्म्मुक्ताः संसारात् सूरयः सदा ॥

'चक्षुर्द्दिवीव व्याप्तं यददृश्यं फलदर्शितम् ।
'सन्दीपयन्ति विज्ञानैः संसारात् प्राप्तजागराः ॥

'विपन्यवो ज्ञानितमा विष्णोर्य्यत् परमं पदम् ।
'तात्पर्य्याभ्यधिकज्ञस्या अर्त्थमेतं पुनर्ज्जगौ' इति ॥

रूपपरमिदम् । स्थानपरत्वे **विष्णोः परमं पदं** श्वेतद्वीपानन्तासन-वैकुण्ठाख्यम् । सु स्वरूपसुखं यैरूरीकृतं ते **सूरयः** संसारान्निर्म्मुक्ताः **पश्यन्ति** । यथा **दिवि आततं चक्षु**र्ज्योतिर्ज्जना न पश्यन्ति । किन्तु ज्ञानिनः पश्यन्ति ॥

तत् पदं **समिन्धते** जानन्ति । इन्धी दीप्तौ । के? **जागृवांसः** संसारात् प्राप्तजागराः । **विप्रासः** । प्रा पूरणे । स्वयोग्यतानुगुणं परिपूर्ण्णाः । **विपन्यवः** । पन स्तुतौ व्यवहारे चेति पठन्ति । ज्ञाने चेति पठनीयम् । पनायते अर्च्चतीति निघण्टुः । ज्ञानद्वारा अर्च्चतीत्यर्थः । पनायतीति पाणिनीयाः । तेन **विपन्यव** इति ज्ञानितमाः पूर्ण्णज्ञानाः । इति शम्

॥ ❋ ॥

गोविन्दः पण्डिताचार्य्यः प्रमृष्टं शब्दतोऽर्त्थतः ।
तापनीयोपनिषदो वितेने भाष्यमुत्तमम् ॥

इत्याचार्य्यगोविन्दस्य कृतिषु तापनीयोपनिषद्भाष्यं सम्पूर्ण्णम् ॥

—०—